

यो दण्डकारण्यनिशाचरेन्द्रान् कोदण्डलीलाविषयीचकार ।
वेतण्डशुण्डायितबाहुदण्ड कोदण्डपाणि: कुलदैवतं न: ॥

# ॥श्रीरामोदन्त:॥

## प्रथम: भाग:

### ॥ बालकाण्ड: आरण्यकाण्ड: अयोध्याकाण्डः किष्किन्धाकाण्डः ॥

(पदविभाग: अन्वय: तात्पर्यम् व्याकरण सहितम्)

## Grammatical Analysis Of SRIRAMODANTHAM


Prepared By: Sarravanan Subramaniam

+91 98426 90555

**सदाशिव समारम्भां शङ्कराचार्यमध्यमाम् ।**
**अस्मदाचार्यपर्यन्तां वन्दे गुरुपरम्पराम् ॥**

श्रृङ्गेरी उभयो: जगद्गुर्वो: **श्री श्री श्री भारती तीर्थ महास्वामिन: श्री श्री विधुशेखरभारती महास्वामिन:** च कृपया अहं श्रीमद्भगवद्गीतां सान्वयं कर्तुम् भाग्यं प्राप्तवान् । अत: मम अनेककोटि नमस्कारान् उभयो: जगद्गुर्वो: पादकमले समर्पयामि ।

**श्री स्वामिनी ब्रह्मलीनानन्दा सरस्वती** मह्यं वेदान्तपाठान् श्रीमद्भगवद्गीतां च बोधयति । भवत्यै मम नमस्कारान् निवेदयामि ।

**श्रीमती उमामहेश्वरी** माता मह्यं संस्कृतं बोधयति । भवत्यै मम नमस्कारान् निवेदयामि ।


**ब्रह्मश्री कृष्ण शर्मा** मह्यं श्रीरामोदन्तं बोधयति । भवते मम नमस्कारान् निवेदयामि ।

अस्मिन् पुस्तके किमपि दोष: अस्ति चेत् तत् मम अज्ञानमेव । अत: मां क्षमस्व इति प्रार्थयामि ।

धन्यवाद:

**शरवण:**

**+91 98426 90555**



# ॥ श्रीरामोदन्तः ॥

## ॥ अथ बालकाण्डः ॥

## || श्रीरामोदन्तः ||      अथ बालकाण्डः

**मूल श्लोकः**

**श्रीपतिं प्रणिपत्याहं श्रीवत्साङ्कितवक्षसम् ।**
**श्रीरामोदन्तमाख्यास्ये श्री वाल्मीकि प्रकीर्तितम् ॥ १॥**

**पदविभागः**

**श्रीपतिं प्रणिपत्य अहं श्रीवत्साङ्कितवक्षसम्**
**श्रीरामोदन्तम् आख्यास्ये श्री वाल्मीकि प्रकीर्तितम्**

**अन्वयः**

**अहं श्रीवत्स अङ्कित वक्षसम्  श्रीपतिं प्रणिपत्य श्री वाल्मीकि प्रकीर्तितम् श्रीरामोदन्तम् आख्यास्ये ।**

**तात्पर्यम्**

**अहं श्रीवत्स अङ्कित वक्षसम्  श्रीपतिं विष्णुं नमस्कृत्य श्री वाल्मीकिना पूर्वं उक्तं श्रीरामोदन्तं नाम कथां वदिष्यामि ।**

**व्याकरणम्**

**♦सन्धिः**

**श्रीवत्स + अङ्कित - सवर्णदीर्घसन्धिः**
**प्रणिपत्य + अहं – सवर्णदीर्घसन्धिः**

**♦समासः**

**श्रीपति - श्रियः पति : षष्ठीतत्पुरुषः**

**आख्यास्ये - लृट् लकारः उपु. एक**
**आत्मनेपदि धातुः**
***आख्यास्ये - आख्यास्यावहे - आख्यास्यामहे***

**मूल श्लोकः**

**पुरा विश्रवसः पुत्रो रावणो नाम राक्षसः ।**
**आसीदस्यानुजौ चास्तां कुम्भकर्णविभिषणौ ॥ २॥**

**पदविभागः**

**पुरा विश्रवसः पुत्रः रावणः नाम राक्षसः आसीत् अस्य अनुजौ च आस्तां कुम्भकर्णः विभिषणः**

**अन्वयः**

**पुरा विश्रवसः पुत्रः रावणः नाम राक्षसः आसीत् तस्य कुम्भकर्णः विभिषणः (नाम) अनुजौ च आस्ताम् ।**

**तात्पर्यम्**

**पूर्वं विश्रवसः नाम मुनिः आसीत् । सः पुलसत्यस्य पुत्र । विश्रवसः मुनये कलत्रद्वयमासीत् । ते नाम कैकसी इडाविडा । रावणः कुम्भकर्णः विभिषणः च कैकेसीयाः पुत्राः । सूर्पनखा तेषाम् सहोदरी । कुबेरः इडाविडायाः पुत्रः आसीत् ।**

**व्याकरणम्**

**♦सन्धिः**

**पुत्रः + रावणः विसर्ग उकारः**
**रावणः + नाम - विसर्ग उकारः**
**च + आस्ताम् - सवर्णदीर्घसन्धिः**

**मूल श्लोक:**

ते तु तीव्रण तपसा प्रत्यक्षीकृत्य वेधसम् ।
वव्रिरे च वरानिष्टान् अस्मादाश्रितवध्सलात् ॥३॥

**पदविभाग:**

ते तु तीव्रण तपसा प्रत्यक्षीकृत्य वेधसम् वव्रिरे च वरान् इष्टान् अस्मात् आश्रितवध्सलात्

**अन्वय:**

ते तीव्रण तपसा प्रत्यक्षीकृत्य अस्मात् आश्रितवध्सलात् वेधसम् इष्टान् वरान् च वव्रिरे ।

**तात्पर्यम्**

रावण: तस्य अनुजौ सह तपस् आश्रितवान् । अत: तेषां मधये ब्रह्मा प्रत्यक्षीकृतवान् । तत: ते इष्टान् वरान् वव्रिरे ।

**व्याकरणम्**

♦सन्धि:

अस्मात् + आश्रितवध्सलात् - जश्त्वसन्धि:

♦वव्रिरे - वृ धातु: आत्मनेपदि लिट् लकार: प्रथमपुरुष:
*वव्रे - वव्राते - वव्रिरे*
प्रत्यक्षीकृत्य - प्रति + अक्षि: + कृत्य

## || श्रीरामोदन्तः || अथ बालकाण्डः

### मूल श्लोकः

रावणो मानुषादन्यैः अवध्यत्वं तथाऽनुजः ।
निर्देवत्वेच्छया निद्रां कुम्भकर्णोऽवृणीत च ॥४॥

### पदविभागः

रावणः मानुषादन्यैः अवध्यत्वं अवृणीत तथा अनुजः च
निर्देवत्व इच्छया निद्रां कुम्भकर्णः

### अन्वयः

रावणः मानुषादन्यैः अवध्यत्वं अवृणीत तथा अनुजः कुम्भकर्णः च
निर्देवत्व इच्छया निद्रां (अवृणीत)।

### तात्पर्यम्

रावणः मानुषादन्यैः अवध्यत्वं वरं प्रापतवान् । तस्य सहोदरः कुम्भकर्णः निर्देवत्व भावं इच्छया सः निद्रावत्वं वरं प्राप्तवान् । अतः सः सर्वदा निद्रां कृतवान्।

### व्याकरणम्

♦सन्धिः

रावणः + मानुषादन्यैः - विसर्ग उकारः
कुम्भकर्णः + अवृणीत - विसर्ग उकारः

अवध्यत्वं - अवध्यस्य भावः
निष्क्रान्तः देवेभ्यः - निर्देवः - निर्देवस्य भावः निर्देवत्वम्
अवृणीत - आत्मनेपदि वृ धातु लङ् लकार प्रथमपुरुषः एकवचनम्
*अवृणीत-अवृणाताम्-अवृणत*

**मूल श्लोकः**

**विभीषणो विष्णुभक्तिं वव्रे सत्वगुणान्वितः ।**
**तेभ्य एतान् वरान् दत्वा तत्रैवान्तर्दधे प्रभुः ॥५॥**

**पदविभागः**

**विभीषणः विष्णुभक्तिं वव्रे सत्वगुणान्वितः तेभ्यः एतान् वरान् दत्वा तत्रैव अन्तर्दधे प्रभुः**

**अन्वयः**

**सत्वगुणान्वितः विभीषणः विष्णुभक्तिं वव्रे । तेभ्यः एतान् वरान् दत्वा प्रभुः तत्रैव अन्तर्दधे ।**

**तात्पर्यम्**

**रावणस्य सहोदरः विभीषणः सः सत्वगुण सम्पन्नः आसीत् । सः विष्णुभक्तिं प्रार्थीतवान् । तेभ्यः (रावणः कुम्भकर्णः विभीषणः) एतान् वरान् दत्वा ब्रह्मा तत्रैव अन्तर्दधे ।**

**व्याकरणम्**

**♦सन्धिः**

**विभीषणः + विष्णुभक्तिं - विसर्ग उकारः**
**अन्तर्दधे - अन्तः + दधे - विसर्गरेफः      तेभ्यः + एतान् - विसर्गलोपः**

**♦समासः**

**सत्वगुणैः अन्वितः - तृतीयातत्पुरुषः**
**दधे - धा आत्मनेपदि धातुः लिट् लकारः प्रथमपुरुषः *दधे-दधाते- दधिरे***
**वव्रिरे - वृ धातुः आत्मनेपदि लिट् लकारः प्रथमपुरुषः *वव्रे - वव्राते - वव्रिरे***

**मूल श्लोक:**

रावणस्तु ततो गत्वा रणे जित्वा धनाधिपम् ।
लङ्कापुरीं पुष्पकं च हत्वा तत्रावसत् सुखम् ॥६॥

**पदविभाग:**

रावण: तु तत: गत्वा रणे जित्वा धनाधिपम्
लङ्कापुरीं पुष्पकं च हत्वा तत्र अवसत् सुखम्

**अन्वय:**

तत: रावण: लङ्कापुरीं गत्वा धनाधिपम् रणे जित्वा पुष्पकं च हत्वा तत्र सुखम् अवसत् ।

**तात्पर्यम्**

रावण: वरं प्राप्तान् । तदनन्दरं स: लङ्कापुरीं गतवान् । तत्र स: धनाधिपतिं जित्वा पुष्पकविमानं च हत्वा तत्रैव सुखम् अवसत् ।

**व्याकरणम्**

♦सन्धि:

रावण: + तु - विसर्ग सकार:
तत: + गत्वा - विसर्ग उकार:
तत्र + अवसत् - सवर्णदीर्घसन्धि:

♦समास:

धनाधिपम् - धनस्य अधिपति: - तम् षष्ठितत्पुरुष:

**मूल श्लोक:**

**यातुधानास्तत: सर्वे रसातलनिवासिन: ।**
**दशाननं समाश्रित्य लङ्कां च सुखमावसन् ॥७॥**

पदविभाग:

**यातुधाना: तत: सर्वे रसातल निवासिन:**
**दशाननं समाश्रित्य लङ्कां च सुखम् आवसन्**

**अन्वय:**

**यातुधाना: सर्वे रसातलनिवासिन: । तत: (ते) दशाननं समाश्रित्य लङ्कां च सुखम् आवसन् ।**

**तात्पर्यम्**

**राक्षसा: पाताललोके अवसन् । यदा रावण: कुबेरं जित्वा लङ्काम् अवसत् तदा ते रावणं समाश्रित्य लङ्का नगरे सुखम् अवसन् ।**

**व्याकरणम्**

**♦सन्धि:**

**यातुधाना: + तत: -विसर्ग सकार:**
**आ+अवसन् - सवर्णदीर्घसन्धि:**

**♦समास:**

**दशानन: - दश आननानि यस्य स: - व्यधिकरणबहुव्रीहि:**

**मूल श्लोक:**

मन्दोदरीं मयसुतां परिणीय दशानन: ।
तस्यासुत्पादयामास मेघनादाह्वयं सुतम् ॥८॥

**पदविभाग:**

मन्दोदरीं मयसुतां परिणीय दशानन:
तस्या: उत्पादयामास मेघनाद आह्वयं सुतम्

**अन्वय:**

दशानन: मयसुतां
मन्दोदरीं परिणीय
तस्या: मेघनाद आह्वयं सुतम् उत्पादयामास ।

**तात्पर्यम्**

मय नाम एक: राक्षस: आसीत् । स: असुराणां नायक: । तस्य पुत्री मन्दोदरी । दशानन: रावण: ताम् विवाहं कृतवान् । पश्चात् मेघनाद नाम सुतं उत्पादयामास ।

**व्याकरणम्**

♦सन्धि:

तस्या: + उत्पादयामास - विसर्ग सकार:
मेघनाद + आह्वयम् - सवर्णदीर्घसन्धि:

♦समास:

मन्दोदरी - मन्दम् उदरं यस्या: सा - मन्दोदरी - समानाधिकरण बहुव्रीहि:
मेघस्य नाद इव नाद: यस्य स: - मेघनाद: - व्यधिकरणबहुव्रीहि:
परिणीय - परि +नीत्वा

**मूल श्लोक:**

रसां रसतलं चैव विजित्य स तु रावण:।
लोकानाक्रमयन् सर्वान् जहार च विलासिनी: ॥९॥

**पदविभाग:**

रसां रसतलं च एव विजित्य स: तु रावण:
लोकान् आक्रमयन् सर्वान् जहार च विलासिनी:

**अन्वय:**

स: रावण: रसां रसतलं च एव विजित्य सर्वान्
लोकान् आक्रमयन् विलासिनी: च जहार ।

**तात्पर्यम्**

लङ्गा नृप: रावण: रसां पातालं च जीतवान् । पश्चात् स: सर्वान् लोकान् आक्रमयन् महिला: च अपहरितवान् ।

**व्याकरणम्**

♦सन्धि:

च + एव - वृद्धिसन्धि:
स: + तु - विसर्गलोप:

विजित्य - वि + जि + ल्यप्
जहार - हृ धातु: आत्मनेपदि लिट् लकार: प्रथमपुरुष:
*जहार - जह्रतु: जह्रु:*

## मूल श्लोक:

**दूषयन् वैदिकं कर्म द्विजानर्दयति स्म स:।**
**आत्मजेन ततो युद्धे वासवं चाप्यपीडयेत् ॥ १०॥**

## पदविभाग:

**दूषयन् वैदिकं कर्म द्विजान् अर्दयति स्म स:**
**आत्मजेन तत: युद्धे वासवं च अपि अपीडयत्**

## अन्वय:

**स: वैदिकं कर्म दूषयन् द्विजान् अर्दयति स्म ।**
**तत: (तस्य) आत्मजेन युद्धे वासवं च अपि अपीडयत् ।**

## तात्पर्यम्

**रावण: वैदिककर्मं दूषितवान् । द्विजान् अर्दयति स्म । पश्चात् तस्य पुत्रेण युद्धे इन्द्रम् अपि अपीडयत् ।**

## व्याकरणम्

**♦सन्धि:**

**तत: + युद्धे - विसर्ग उकार:**
**च + अपि - सवर्णदीर्घसन्धि:**
**अपि + अपीडयत् - यण्सन्धि:**

**♦समास:**

**द्वि: जायन्ते इति द्विजा: बहुव्रीहि:**

**मूल श्लोकः**

**तदीयतरुरत्नानि पुनरानाय्य किङ्करैः ।**
**स्थापयित्वा तु लङ्कायाम् अवसच्च चिराय सः ॥११॥**

**पदविभागः**

**तदीय तरुरत्नानि पुनः आनाय्य किङ्करैः**
**स्थापयित्वा तु लङ्कायाम् अवसत् च चिराय सः**

**अन्वयः**

**तदीय किङ्करैः तरुरत्नानि पुनः आनाय्य : स्थापयित्वा च तु सः लङ्कायाम् चिराय अवसत् ।**

**तात्पर्यम्**

**रावणः तस्य किङ्करैः कल्पकवृक्षः पुनः आनाय्य स्थापितवान् । अतः सः लङ्कायां बहु कालम् अवसत् ।**

**व्याकरणम्**

**♦सन्धिः**

**पुनः + आनाय्य - विसर्ग रेफः**

**अवसत् + च - श्चुत्वसन्धिः**

**मूल श्लोक:**

ततस्तस्मिन्नवसरे विधातारं दिवौकस: ।
उपगम्योचिरे सर्वं रावणस्य विचेष्टितम् ॥१२॥

**पदविभाग:**

तत: तस्मिन् अवसरे विधातारं दिवौकस:
उपगम्य उचिरे सर्वं रावणस्य विचेष्टितम्

**अन्वय:**

तत: तस्मिन् अवसरे विधातारं दिवौकस: उपगम्य रावणस्य विचेष्टितम् सर्वं उचिरे ।

**तात्पर्यम्**

पश्चात् तस्मिन समये देवा: ब्रह्मा समीपे गत्वा रावणस्य विचेष्टितम् सर्वं उक्तवन्त: ।

**व्याकरणम्**

♦सन्धि:

तत: + तस्मिन् - विसर्ग सकार:
तस्मिन् + अवसरे - ङमुडागमन सन्धि:
उपगम्य + उचिरे - गुणसन्धि:

♦समास:

दिवौकस: - द्यो: ओक: येषाम् ते बहुव्रीहि:

*ऊचिरे - ब्रू आत्मनेपदि धातु: लिट् लकार: प्रथमपुरुष:*
*ऊचे-ऊचाते-ऊचिरे*

**मूल श्लोकः**

**तदाकर्ण्य सुरैः साकं प्राप्य दुग्धोदधेस्तटम् ।**
**तुष्टाव च हृषीकेशं विधाता विविधैः स्तवैः ॥१३॥**

**पदविभागः**

**तदा आकर्ण्य सुरैः साकं प्राप्य दुग्धोदधेः तटम् तुष्टाव च हृषीकेशं विधाता विविधैः स्तवैः**

**अन्वयः**

**तदा आकर्ण्य विधाता सुरैः साकं दुग्धोदधेः तटम् प्राप्य च हृषीकेशं विविधैः स्तवैः तुष्टाव ।**

**तात्पर्यम्**

**यदा देवाः विधातारम् उक्तवन्तः तदा सः तत् श्रुत्वा सुरैः सह दुग्धोदधेः तटम् प्राप्य श्रीमहाविष्णुम् नानाविध स्तवैः सन्तुष्टवान् ।**

**व्याकरणम्**

**♦सन्धिः**

**तदा + आकर्ण्य - सवर्णदीर्घसन्धिः**
**दुग्धिदधेः + तटम् - विसर्ग सकारः**

**हृषीकेशः - हृषीकानाम् ईशः षष्ठीतत्पुरुषः**

***तुष्टाव - स्तु धातुः परस्मैपदि धातुः लिट् लकारः प्रथमपुरुषः***
***तुष्टाव-तुष्टुवतुः-तुष्टुवुः***

**मूल श्लोकः**

**आविर्भूयाथ दैत्यारिः पप्रच्छ च पितामहम् ।**
**किमर्थमागतोसि त्वं साकं देवगणैरिति ॥ १४॥**

**पदविभागः**

**आविर्भूय अथ दैत्यारिः पप्रच्छ च पितामहम्**
**किमर्थम् अागतः आसि त्वं साकं देवगणैः इति**

**अन्वयः**

**अथ आविर्भूय दैत्यारिः पितामहम् किमर्थम् त्वं देवगणैः साकं च अागतः आसि इति पप्रच्छ ।**

**तात्पर्यम्**

**ब्रह्मा देवगणैः सह महाविष्णुम् मेलितुम् गतवान् । अत्र महाविष्णुः तेषां मध्ये आविर्भूय *"पितामह ! त्वं किमर्थम् देवगणैः सह अत्र अगतः"* इति पृष्टवान् ।**

**व्याकरणम्**

**♦सन्धिः**

**आविर्भूय + अथ - सवर्णदीर्घसन्धिः**
**अगतः + असि - विसर्ग उकारः पूर्वरूपसन्धिः**
**देवगणैः + इति - विसर्ग रेफः**

**♦समासः**

**दैत्यारिः - दैत्यानाम् अरिः - षष्ठीतत्पुरुषः**

**मूल श्लोक:**

ततो दशाननात् पीडाम् अजस्तस्मै न्यवेदयत् ।
तच्छ्रुत्वोवाच धातारं हर्षयन् विष्टरश्रवा: ॥१५॥

**पदविभाग:**

तत: दशाननात् पीडाम् अज: तस्मै न्यवेदयत् तत् श्रुत्वा उवाच धातारं हर्षयन् विष्टरश्रवा:

**अन्वय:**

तत: अज: दशाननात् पीडाम् तस्मै न्यवेदयत् ।
तत् श्रुत्वा विष्टरश्रवा: हर्षयन् धातारं उवाच ।

**तात्पर्यम्**

पश्चात् ब्रह्मा रावणात् पीडाम् अवदत् । तत् श्रुत्वा श्रीविष्णु: हर्षयन् धातारम् अवदत् ।

**व्याकरणम्**

♦सन्धि:
तत: + दशाननात् - विसर्ग उकार:
अज: + तस्मै - विसर्गसकार:
तत् + श्रुत्वा - छत्वसन्धि:
श्रुत्वा + उवाच - गुणसन्धि:

न जायते इति अज: (ब्रह्मा)
विष्टरश्रवा: - महाविष्णु:
*उवाच - ब्रू परस्मैपदि धातु: लिट् लकार प्रथमपुरुष:*
*उवाच-ऊचतु:-ऊचु:*

मूल श्लोकः
अलं भयेनात्मयोने ! गच्छ देवगणैः सह ।
अहं दाशरथिर्भूत्वा हनिष्यामि दशाननम् ॥१६॥

**पदविभागः**

अलं भयेन आत्मयोने ! गच्छ देवगणैः सह अहं दाशरथिः भूत्वा हनिष्यामि दशाननम्

**अन्वयः**

हे आत्मयोने ! अलं भयेन। (त्वम् ) देवगणैः सह गच्छ । अहं दाशरथिः भूत्वा दशाननम् हनिष्यामि ।

**तात्पर्यम्**

हे अज! भयम् मास्तु । त्वं देवगणैः सह गच्छ । अहं दशरथस्य पुत्ररूपेण जनित्वा दशाननं हनिष्यामि ।

**व्याकरणम्**
♦सन्धिः
भयेन + आत्मयोने - सवर्णदीर्घसन्धिः
दाशरथिः + भूत्वा - विसर्ग रेफः

दशरथस्य अपत्यं पुमान् दाशरथिः

**मूल श्लोक:**

**आत्मांशैश्च सुरा: सर्वे भूमौ वानररूपिण: ।**
**जायेरन् मम साहाय्यं कर्तुं रावणनिग्रहे ॥१७॥**

**पदविभाग:**

**आत्मांशै: च सुरा: सर्वे भूमौ वानररूपिण: जायेरन् मम साहाय्यं कर्तुं रावणनिग्रहे**

**अन्वय:**

**रावणनिग्रहे मम साहाय्यं कर्तुं सुरा: सर्वे आत्मांशै: च भूमौ वानररूपिण: जायेरन् ।**

**तात्पर्यम्**

**सर्वे देवा: अपि आत्मांशै: च भूमौ रावणनिग्रहे मम साहाय्यं कर्तुं वानररूपिण: (इव) जायेरन् ।**

**व्याकरणम्**

**♦सन्धि:**

**आत्मांशै: + च - विसर्गसकार:**

***जायरेन् - जन् आत्मनेपदि धातु:***
***विधिलिङ् प्रथमपुरुष:***
***जायेत-जायेयाताम् -जायेरन्***

**मूल श्लोकः**

एवमुक्त्वा विधातारं तत्रैवान्तर्दधे प्रभुः ।
पद्मयोनिस्तु गीर्वाणैः समं प्रायात्प्रहृष्टधीः ॥१८॥

**पदविभागः**

एवम् उक्त्वा विधातारं तत्र एव अन्तर्दधे प्रभुः पद्मयोनिः तु गीर्वाणैः समं प्रायात् प्रहृष्टधीः

**अन्वयः**

एवम् विधातारं उक्त्वा प्रभुः तत्र एव अन्तर्दधे । पद्मयोनिः तु प्रहृष्टधीः गीर्वाणैः समं प्रायात् ।

**तात्पर्यम्**

महाविष्णुः एवं समाधान वाक्यम उक्तवा तत्र एव अन्तर्गतः । महाविष्णोः वाक्येन सन्तुष्ट ब्रह्मा सन्तोषेण देवाः सह प्रायात् ।

**व्याकरणम्**

♦सन्धिः

पद्मयोनिः + तु - विसर्गसकारः

♦समासः

पद्मयोनिः - पद्मं योनिः यस्य सः बहुव्रीहिः

प्रायात् - *या धातुः परस्मैपदि लङ लकारः प्रथमपुरुषः*
*अयात्- अयाताम्- अयान्/अयुः*
प्र + अयात् = प्रायात्

**मूल श्लोकः**

अजीजनत्ततः शक्रो वालिनं नाम वानरम् ।
सुग्रीवमपि मार्ताण्डो हनुमन्तं च मारुतः ॥१९॥

**पदविभागः**

अजीजनत् ततः शक्रः वालिनं नाम वानरम् सुग्रीवम् अपि मार्ताण्डः हनुमन्तं च मारुतः

**अन्वयः**

ततः शक्रः वालिनं नाम वानरम् (अजीजनत्), मार्ताण्डः सुग्रीवम् अपि अजीजनत् ।
मारुतः हनुमन्तं च (अजीजनत्) ।

**तात्पर्यम्**

पश्चात् इन्द्रः वालिनं नाम वानरम् अजीजनत् । सूर्यः सुग्रीवम् नाम अजीजनत् ।
वायुः हनुमन्तं च नाम अजीजनत् ।

**व्याकरणम्**

♦सन्धिः

मार्ताण्डः + हनुमन्तम् - विसर्ग उकारः

**मूल श्लोकः**

**पुरैव जनयामास जाम्बवन्तं च पद्मजः ।**
**एवमन्ये च विबुधाः कपीनजनयन्बहून् ॥१०॥**

**पदविभागः**

**पुरा एव जनयामास जाम्बवन्तं च पद्मजः  एवम् अन्ये च विबुधाः कपीन् अजनयन् बहून्**

**अन्वयः**

**पद्मजः पुरा एव जाम्बवन्तं च जनयामास । एवम् अन्ये च विबुधाः कपीन् बहून् अजनयन् ।**

**तात्पर्यम्**

**ब्रह्मा पुरा एव जाम्बवन्त च जनयामास । इत्थम् अन्ये च देवाः बहून् कपिन च अजनयन् ।**

**व्याकरणम्**

**♦सन्धिः**

**पुरा + एव - वृद्धिसन्धिः**

**जनयामास - *जन् धातुः परस्मैपदि लिट् लकारः प्रथमपुरुषः एकवचनम्***

**मूल श्लोकः**

ततो वानरसङ्घानां वाली परिवृढोऽभवत् ।
अमीभिरखिलैः साकं किष्किन्धामध्युवास च ॥२१॥

**पदविभागः**

ततः वानरसङ्घानां वाली परिवृढः अभवत् । अमीभिः अखिलैः साकं किष्किन्धाम् अध्युवास च

**अन्वयः**

ततः वाली वानरसङ्घानां परिवृढः अभवत् । अमीभिः अखिलैः साकं किष्किन्धाम् अध्युवास च ।

**तात्पर्यम्**

पश्चात् वाली वानरसङ्खानाम् परिवृढः (नायकः) अभवत् । सः स्वस्य जनपरिवारेण सह किष्किन्धाम् अबसत् ।

**व्याकरणम्**

♦सन्धिः
ततः + वानरसङ्खानाम् - विसर्ग उकारः
परिवृढः + अभवत् - विसर्ग उकारः पूर्वरूपसन्धिः
अमीभिः + अखिलैः - विसर्ग रेफः

## || श्रीरामोदन्तः ||     अथ बालकाण्डः

**मूल श्लोकः**

आसीद्दशरथो नाम सूर्यवंशेऽथ पार्थिवः ।
भार्यास्तिस्रोऽपि लब्ध्वासौ तासु लेभे न सन्ततिम् ॥२२॥

**पदविभागः**

आसीत् दशरथः नाम सूर्यवंशे अथ पार्थिवः । भार्याः तिस्रः अपि लब्ध्वा असौ तासु लेभे न सन्ततिम्

**अन्वयः**

अथ सूर्यवंशे दशरथः नाम पार्थिव आसीत् । असौ तिस्रः भार्याः अपि लब्ध्वा तासु सन्ततिं न लेभे ।

**तात्पर्यम्**

सूर्यवंशे दशरथः नाम राजा आसीत् । तस्मै कलत्रत्रयम् आसीत् । परन्तु अपि ताभ्यः सन्तान भाग्यम् न प्राप्तवन्तः ।

**व्याकरणम्**

♦सन्धिः

| | |
|---|---|
| आसीत् + दशरथः - जश्त्वसन्धिः | दशरथः + नाम - विसर्ग उकारः |
| सूर्यवंशे + अथ - पूर्वरूपसन्धिः | भार्याः + तिस्र - विसर्ग सकारः |
| तिस्रः + अपि - विसर्ग उकारः | लब्ध्वा + असौ - सवर्णदीर्घसन्धिः |

लभे - लभ् आत्मनेपदि धातु. लिट् लकारः प्रथमपुरुषः
लेभे-लेभाते-लेभिरे

**मूल श्लोक:**

ततः सुमन्त्रवचनादृष्यशृङ्गं स भूपतिः ।
आनीय पुत्रकामेष्टिमारेभे सपुरोहितः ॥२३॥

**पदविभाग:**

ततः सुमन्त्रवचनात् ऋष्यशृङ्गं सः भूपतिः आनीय पुत्रकामेष्टिम् आरेभे सपुरोहितः

**अन्वय:**

ततः सुमन्त्रवचनात् सः भूपतिः सपुरोहितः ऋष्यशृङ्गं आनीय पुत्रकामेष्टिम् आरेभे ।

**तात्पर्यम्**

दशरथ: पुत्ररहित: आसीत् । अत: स: सुमन्त्रवचनात् सपुरोहितः ऋष्यशृङ्गं आनीय पुत्रकामेष्टिम् आरब्धवान् ।

**व्याकरणम्**

♦सन्धि:

सुमन्त्रवचनात + ऋष्यशृङ्गं - जश्त्वसन्धि:
सः + भूपतिः - विसर्गलोप:

♦समास:

पुरोहितेन सह वर्तते इति सपुरोहित: - सहपूर्वपद बहुव्रीहिसमास:

## || श्रीरामोदन्तः ||     अथ बालकाण्डः

**मूल श्लोकः**

**अथाग्नेरुत्थितः कश्चित् गृहीत्वा पायसं चरुम् ।**
**एतत्प्राशय पत्नीस्त्वम् इत्युक्त्वाऽदान्नृपाय सः ॥२४॥**

**पदविभागः**

**अथ अग्नेः उत्थितः कश्चित् गृहीत्वा पायसं चरुम् एतत् प्राशय पत्नीः त्वम् इति उक्त्वा अदात् नृपाय सः**

**अन्वयः**

**अथ कश्चित् अग्नेः उत्थितः पायसं चरुम् गृहीत्वा त्वम् एतत् पत्नीः प्राशय इति उक्त्वा सः नृपाय अदात् ॥**

**तात्पर्यम्**

**दशरथः पुत्रकामेष्टि यागम् कृतवान् । याग समये कश्चित् अग्नेः उत्थितः पायसं चरुम् गृहीत्वा त्वम् एतत् पत्नीः प्राशय इति उक्त्वा सः नृपाय अदात् ।**

**व्याकरणम्**

**♦सन्धिः**

**अथ + अग्ने - सवर्णदीर्घसन्धिः**

**अग्नेः +उत्थितः - विसर्गरेफः**

**पन्नीः + त्वम् - विसर्गसकारः**

**इति + उक्त्वा- यण्सन्धिः**

**अदात् + नृपाय - ङमुडागमन सन्धिः**

## || श्रीरामोदन्तः ||     अथ बालकाण्डः

**मूल श्लोकः**

तद्गृहीत्वा तदैवासौ पत्नीः प्राशयदुत्सुकः ।
ताश्च तत्प्राशनादेव नृपाद्गर्भमधारयन् ॥२५॥

**पदविभागः**

तत् गृहीत्वा तत् एव असौ पत्नीः प्राशयत् उत्सुकः ताः च तत्प्राशनाद् एव नृपात् गर्भम् अधारयन्

**अन्वयः**

असौ उत्सुकः तद् गृहीत्वा तत् एव पत्नीः प्राशयत् । ताः च नृपात् तत्प्राशनात् एव गर्भम् अधारयन् ।

**तात्पर्यम्**

दशरथः तत् पायसं गृहीत्वा स्वस्य पत्नीः प्राशयत् ।
ताः च नृपात् पायसं गृहीत्वा गर्भं अधारयन् ।

**व्याकरणम्**

♦सन्धिः
तत् + गृहीत्वा - जश्त्वसन्धिः
तत् + एव - जश्त्वसन्धिः
एव + असौ - सवर्णदीर्घसन्धिः
प्राशयत् + उत्सुकः - जश्त्वसन्धिः
ताः + च - विसर्ग सकारः
तत्प्राशनात् + एव - जश्त्वसन्धिः
नृपात् + गर्भम् - जश्त्वसन्धिः

## || श्रीरामोदन्तः ||      अथ बालकाण्डः

### मूल श्लोकः

पूर्णे कालेऽथ कौसल्या सज्जनाम्भोजभास्करम् ।
अजीजनद्रामचन्द्रं कैकेयी भरतं तथा ॥२६॥

### पदविभागः

पूर्णे काले अथ कौसल्या सज्जनाम्भोजभास्करम् अजीजनत् रामचन्द्रं कैकेयी भरतं तथा

### अन्वयः

अथ पूर्णे काले कौसल्या सज्जनाम्भोजभास्करं रामचन्द्रं अजीजनत् ।
तथा कैकेयी भरतं (अजीजनत्) ।

### तात्पर्यम्

दशरथस्य पुत्रकामेष्टि यागस्य फलेन पूर्णे समये कौसल्या सज्जनाम्भोजानि भास्करः इव श्री रामचन्द्रं अजीजनत् । तथा कैकेयी अपि भरतं अजीजनत् ।

### व्याकरणम्

♦सन्धिः
काले + अथ - पूर्वरूपसन्धिः
अजीजनत् + रामचन्द्रम् - जश्त्वसन्धिः

♦समासः
रामचन्द्रः रामः चन्द्रः इव - उपमानोत्तरपदकर्मधारयसमासः
सज्जनाः एव अम्भोजानि -
सज्जनाम्भोजानि - अवधारणपूर्वपदकर्मधारयसमासः
सज्जनाम्भोजानि - तेषां भासकरः षष्ठीतत्पुरुषः

**मूल श्लोक:**

**ततो लक्ष्मणशत्रुघ्नौ सुमित्राजीजनत्सुतौ ।**
**अकारयत्पिता तेषां जातकर्मादिकं द्विजैः ॥२७॥**

**पदविभाग:**

**ततः लक्ष्मणशत्रुघ्नौ सुमित्रा अजीजनत् सुतौ अकारयत् पिता तेषां जातकर्मादिकं द्विजैः**

**अन्वय:**

**ततः सुमित्रा लक्ष्मण-शत्रुघ्नौ सुतौ अजीजनत् । पिता द्विजैः तेषां जातकर्मादिकं अकारयत् ।**

**तात्पर्यम्**

**ततः सुमित्रा लक्ष्मण: शत्रुघ्न: इति पुत्रद्वयं अजीजनत् । पश्चात् राजा दशरथ: द्विजैः तेषां जातकर्मादिकं अकारयत् ।**

**व्याकरणम्**

**♦सन्धि:**

**ततः + लक्ष्मणशत्रुघ्नौ - विसर्ग उकार:**
**सुमित्रा + अजीजनत् - सवर्णदीर्घसन्धि:**

## मूल श्लोकः

ततो ववृधिरेऽन्योन्यं स्निग्धाश्चत्वार एव ते ।
सकलासु च विद्यासु नैपुण्यमभिलेभिरे ॥२८॥

## पदविभागः

ततः ववृधिरे अन्योन्यं स्निग्धाः चत्वारः एव ते । सकलासु च विद्यासु नैपुण्यम् अभिलेभिरे ॥

## अन्वयः

ततः ते चत्वारः एव अन्योन्यं स्निग्धाः ववृधिरे । सकलासु च विद्यासु नैपुण्यम् अभिलेभिरे ॥

## तात्पर्यम्

ते (रामः लक्ष्मणः भरतः सत्रुघ्नः ) अन्योनयेन वर्धन्ते । ते सर्वे सकलासु च विद्यासु नैपुण्यम् प्राप्तवन्तः ।

## व्याकरणम्

♦सन्धिः

ततः + ववृधिरे - विसर्ग उकारः
ववृधिरे + अन्योन्यम् - पूर्वरूपसन्धिः
स्निग्धाः + चत्वारः - विसर्ग सकारः
चत्वारः + एव - विसर्ग लोपः
ववृधिरे - वृध् धातु लिट् लकारः प्रथमपुरुषः
ववृधे- ववृधाते- ववृधिरे

निपुणस्य भावः नैपुण्यम्

**मूल श्लोकः**

ततः कदाचिदागत्य विश्वामित्रो महामुनिः ।
ययाचे यज्ञरक्षार्थं रामं शक्तिधरोपमम् ॥२९॥

**पदविभागः**

ततः कदाचित् आगत्य विश्वामित्रः महामुनिः ययाचे यज्ञ रक्षार्थं रामं शक्तिधर उपमम्

**अन्वयः**

ततः कदाचित् विश्वामित्रः महामुनिः आगत्य यज्ञ रक्षार्थं शक्तिधर उपमम् रामं ययाचे ।

**तात्पर्यम्**

पश्चात् विश्वामित्र मुनिः आगत्य तस्य यज्ञ रक्षणार्थं शक्तिधर उपमम् रामं प्रेषयतु इति अयाचत् ।

**व्याकरणम्**

♦सन्धिः

कदाचित् + आगत्य - जश्त्वसन्धिः
विश्वामित्रः + महामुनिः - विसर्ग उकारः

ययाचे- याच् आत्मनेपदि धातुः लिट् लकारः प्रथमपुरुषः
ययाचे-ययाचाते- ययाचिरे

**मूल श्लोकः**

**वसिष्ठवचनाद्रामं लक्ष्मणेन समन्वितम् ।**
**कृच्छ्रेण नृपतिस्तस्य कौशिकस्य करे ददौ ॥३०॥**

**पदविभागः**

**वसिष्ठ वचनात् रामं लक्ष्मणेन समन्वितम् कृच्छ्रेण नृपतिः तस्य कौशिकस्य करे ददौ**

**अन्वयः**

**नृपतिः वसिष्ठवचनात् लक्ष्मणेन समन्वितम् रामं कृच्छ्रेण तस्य कौशिकस्य करे ददौ ।**

**तात्पर्यम्**

**विश्वामित्रः आगत्य यज्ञरक्षणार्थं रामं ययाचे । अतः राजा दशरथः वसिष्ठस्य वचनात् लक्ष्मणेन सह रामं कृच्छ्रेण कौशिकस्य करे ददौ ।**

**व्याकरणम्**

**♦सन्धिः**

**वचनात + रामं - जश्त्वसन्धिः**

**नृपतिः + तस्य - विसर्ग सकारः**

**♦समासः**

**नृणाम् पतिः नृपतिः - षष्ठी तत्पुरुषः**

**ददौ - दा धातुः लिट् लकारः प्रथमपुरुषः**

**ददौ-ददतुः-ददुः**

**मूल श्लोकः**

**तौ गृहीत्वा ततो गच्छन्बलामतिबलां तथा ।**
**अस्त्राणि च समग्राणि ताभ्यामुपदिदेश सः ॥३१॥**

**पदविभागः**

**तौ गृहीत्वा ततः गच्छन् बलाम् अतिबलां तथा अस्त्राणि च समग्राणि ताभ्याम् उपदिदेश सः**

**अन्वयः**

**ततः सः तौ गृहीत्वा गच्छन् बलाम् अतिबलां तथा अस्त्राणि च समग्राणि ताभ्याम् उपदिदेश ।**

**तात्पर्यम्**

**पश्चात् विश्वामित्रः रामलक्ष्मणौ गृहीत्वा गच्छन् ताभ्यां बला अतिबला मन्त्रद्वयम् च सर्वाणि अस्त्राणि च उपदिदेश ।**

**व्याकरणम्**

**♦सन्धिः**

**ततः + गच्छन् - विसर्ग उकारः**

**मूल श्लोकः**

गच्छन् सहानुजो रामः कौशिकेन प्रचोदितः ।
ताटकामवधीद्धीमान् लोकपीडनतत्पराम् ॥३२॥

**पदविभागः**

गच्छन् सहानुजः रामः कौशिकेन प्रचोदितः ताटकाम् अवधीद् धीमान् लोकपीडनतत्पराम्

**अन्वयः**

धीमान् रामः सहानुजः गच्छन् कौशिकेन प्रचोदितः लोक पीडन तत्पराम् ताटकां अवधीत् ।

**तात्पर्यम्**

धीमान् सलक्ष्मणः रामः यागरक्षणार्थं गतवान् । अतः सः कौशिकेन प्रचोदितः लोकपीडन तत्पराम् ताटकाम् अवधीत् ।

**व्याकरणम्**

♦सन्धिः

सह + अनुजः सहानुजः - सवर्णदीर्घसन्धिः
सहानुजः + रामः - विसर्ग उकारः
अवधीत् + धीमान् - जश्त्वसन्धिः

♦समासः

सहानुजः अनुजेन सह वर्तते इति - सहपूर्वपदकर्मधारयसमासः

धीः अस्य अस्ति इति धीमान्
अवधीत् - हन् धातुः लुङ् लकारः प्रथमपुरुषः एकवचनम्
*अवधीत् - अवधिष्टाम् - अवधिषुः*

## मूल श्लोकः

ततः सिद्धाश्रमं प्राप्य कौशिकः सहराघवः ।
अध्वरं च समारेभे राक्षसाश्च समागमन् ॥३३॥

## पदविभागः

ततः सिद्धाश्रमं प्राप्य कौशिकः सहराघवः । अध्वरं च समारेभे राक्षसाः च समागमन्

## अन्वयः

ततः कौशिकः सहराघवः सिद्धाश्रमं प्राप्य अध्वरं च समारेभे। राक्षसाः च समागमन्

## तात्पर्यम्

पश्चात् रामः कौशिकेन सह सिद्धाश्रमं प्राप्तवान् । तत्र कौशिकः यागं आरब्धवान् । अतः राक्षसाः च तत्र समागमन् ।

## व्याकरणम्

♦सन्धिः

राक्षसाः + च - विसर्ग सकारः

♦समासः

सिद्धानाम् आश्रमः सिद्धाश्रमः - षष्ठीतत्पुरुषः
राघवेण सहवर्तते इति सहराघवः - सहपूर्वपदकर्मधारयसमासः

समागमन् - सम् + आ + अगमन्
अगमन् गम् धातुः लुङ् लकारः प्रथम पुरुषः *अगमत् -अगमताम्-अगमन्*

**मूल श्लोकः**

राघवस्तु ततोऽस्त्रेण क्षिप्त्वा मारीचमर्णवे ।
सुबाहुप्रमुखान् हत्वा यज्ञं चापालयन्मुनेः ॥३४॥

**पदविभागः**

राघवः तु ततः अस्त्रेण क्षिप्त्वा मारीचम् अर्णवे । सुबाहु-प्रमुखान् हत्वा यज्ञं चापालयत् मुनेः

**अन्वयः**

ततः राघवः तु मारीचम् अस्त्रेण अर्णवे क्षिप्त्वा सुबाहु प्रमुखान् हत्वा मुनेः यज्ञं च अपालयत् ॥३४॥

**तात्पर्यम्**

पश्चात् रामः मारीचम् अस्त्रेण अर्णवे क्षिप्तवान् । अतः सुबाहु प्रमुखान् च हत्वा कौसिक मुनेः यज्ञं च अपालयत् ।

**व्याकरणम्**

♦**सन्धिः**

राघवः + तु - विसर्गसकारः
ततः + अस्त्रेण - विसर्गउकारः पूर्वरूपसन्धिः
च + अपालत् - सवर्णदीर्घसन्धिः
अपालयत् + मुनेः -अनुनासिका सन्धिः

♦**समासः**

सुबाहुः प्रमुखः येषां ते तान् - सुबाहुप्रमुखान्

♦**कृदन्ताः**

क्षिप्त्वा - क्षिप् + क्त्वा प्रत्ययः

**मूल श्लोकः**

**कौशिकेन ततो रामो नीयमानः सहानुजः ।**
**अहल्याशापनिर्मोक्षं कृत्वा सम्प्राप मैथिलम् ॥३५॥**

**पदविभागः**

**कौशिकेन ततः रामः नीयमानः सहानुजः । अहल्याशापनिर्मोक्षं कृत्वा सम्प्राप मैथिलम्**

**अन्वयः**

**ततः कौशिकेन नीयमानः रामः सहानुजः अहल्याशापनिर्मोक्षं कृत्वा मैथिलम् सम्प्राप**

**तात्पर्यम्**

**यज्ञरक्षणानन्दरं कौशिकेन नीयमानः रामः सहानुजः अहल्यायाः शापं निर्मोक्षं कृतवान् अतः मिथिलां गत्वा जनकं सम्प्राप ।**

**व्याकरणम्**

**♦सन्धिः**

**ततः + रामः - विसर्ग उकारः**

**रामः + नीयमानः - विसर्ग उकारः**

**♦समासः**

**अनुजेन सह वर्तते इति सहानुजः - सहपूर्वपदकर्मधारयसमासः**

**अहल्यायाः शापम् - अगल्याशापम् - षष्ठीतत्पुरुषः**

**तस्मात् निर्मोक्षम् - अहल्याशापनिर्मोक्षम् - पञ्चमीतत्पुरुषः**

**♦कृदन्ताः**

**कृत्वा - कृ + क्त्वा प्रत्ययः**

**मूल श्लोकः**

**जनकेनार्चितो रामः कौशिकेन प्रचोदितः ।**
**सीतानिमित्तमानीतं बभञ्ज धनुरैश्वरम् ॥३६॥**

**पदविभागः**

**जनकेन अर्चितः रामः कौशिकेन प्रचोदितः सीतानिमित्तमानीतं बभञ्ज धनुः ऐश्वरम्**

**अन्वयः**

**रामः जनकेन अर्चितः कौशिकेन प्रचोदितः सीतानिमित्तमानीतं ऐश्वरं धनुः बभञ्ज ।**

**तात्पर्यम्**

**यदा रामः मिथिलां प्राप्तवान् तदा सः जनकेन अर्चितः । अतः कौशिकेन प्रचोदितः सीतानिमित्तमानीतं ऐश्वरं धनुः बभञ्ज ।**

**व्याकरणम्**

**♦सन्धिः**

**जनकेन + अर्चितः- सवर्णदीर्घसन्धिः**
**अर्चितः + रामः - विसर्ग उकारः**
**धनुः + ऐश्वरम् - विसर्गरेफः**

**♦समासः**

**सीता निमित्तम् यस्य तत् - सीतानिमित्तम् - बहुव्रीहिः**
**ईश्वरस्य इदम् - ऐश्वरम्**
**बभञ्ज - भञ्ज् धातुः लिट् लकारः प्रथमपुरुषः *बभञ्ज - बभञ्जतुः - बभञ्जः***

## || श्रीरामोदन्तः ||      अथ बालकाण्डः

**मूल श्लोकः**

**ततो दशरथं दूतैरानाय्य मिथिलाधिपः ।**
**रामादिभ्यस्ततस्तेभ्यः सीताद्याः कन्यका ददौ ॥३७॥**

**पदविभागः**

**ततः दशरथं दूतैः आनाय्य मिथिलाधिपः रामादिभ्यः ततः तेभ्यः सीताद्याः कन्यका ददौ**

**अन्वयः**

**ततः मिथिलाधिपः दशरथं दूतैः आनाय्य तेभ्यः रामादिभ्यः सीताद्याः कन्यकाः ददौ**

**तात्पर्यम्**

**ततः मिथिलाधिपः जनकः दशरथं दूतैः आनाय्य तस्य पुत्रेभ्यः रामादिभ्यः (रामः लक्ष्मणः भरतः शत्रघ्नः) सीताद्याः (सीता ऊर्मिला माण्डवी श्रुतकीर्तिः) कन्यकाः ददौ ।**

**व्याकरणम्**

**♦सन्धिः**

**ततः + दशरथं - विसर्ग उकारः**
**दूतैः + आनाय्य -विसर्गरेफः**
**रामादिभ्यः + ततः - विसर्गसकारः**
**ततः + तेभ्यः -विसर्गसकार**

**♦समासः**

**मिथिलाधिपः - मिथिलायाः अधिपः - षष्ठीतत्पुरुषः**

**ददौ - दा धातुः लिट् लकारः प्रथमपुरुषः *ददौ - ददतुः - ददुः***
**आनाय्य - आ + नी धातुः + णिच्**

## || श्रीरामोदन्त: ||      अथ बालकाण्ड:

### मूल श्लोक:

ततो गुरुनियोगेन कृतोद्वाहः सहानुजः ।
राघवो निर्ययौ तेन जनकेनोरुमानितः ॥३८॥

### पदविभाग:

ततः गुरु नियोगेन कृत उद्वाहः सहानुजः राघवः निर्ययौ तेन जनकेन उरुमानितः

### अन्वय:

ततः गुरु नियोगेन कृत उद्वाहः राघवः सहानुजः तेन जनकेन उरुमानितः निर्ययौ।

### तात्पर्यम्

ततः गुरु नियोगेन कृत विवाहः राघवः सहानुजः तेन जनकेन उरुमानितः निर्ययौ। ।

### व्याकरणम्

♦सन्धि:

ततः + गुरुनियोगेन - विसर्गउकार:

राघवः + निर्ययौ -विसर्गउकार:

जनकेन + उरुमानितः - गुणसन्धि:

♦समास:

कृत: उद्वाह: येन स: - कृतोद्वाहः - बहुव्रीहिसमास:

निर्ययौ - निर् + ययौ या धातु: लिट् लकार: प्रथमपुरुष:

*ययौ-ययतु:-ययु:*

**मूल श्लोक:**

तदाकर्ण्य धनुर्भङ्गमायान्तं रोषभीषणम् ।
विजित्य भार्गवं राममयोध्यां प्राप राघवः ॥३९॥

**पदविभाग:**

तत् आकर्ण्य धनुर्भङ्गम् आयान्तं रोषभीषणम् विजित्य भार्गवं रामम् अयोध्यां प्राप राघवः

**अन्वय:**

तत् धनुर्भङ्गम् आकर्ण्य आयान्तं रोषभीषणम् भार्गवं रामम् विजित्य राघवः अयोध्यां प्राप ।

**तात्पर्यम्**

तत् धनुर्भङ्गम् आकर्ण्य आयान्तं रोषभीषणम् परशुरामम् विजित्य राघवः अयोध्यां गतवान् ।

**व्याकरणम्**

♦सन्धि:
तत् + आकर्ण्य - जश्त्वसन्धि:

♦कृदन्ता:
विजित्य - वि+ जि + ल्यप् प्रत्यय:
आकर्ण्य - आ + कर्ण् + ल्यप् प्रत्यय:

♦तद्धितान्ता:
भृगो: गोत्रापत्यं पुमान् भार्गव: = भार्गवं रामम् - परशुरामम्

**मूल श्लोक:**

ततः सर्वजनानन्दं कुर्वाणश्चेष्टितैः स्वकैः ।
तामध्युवास काकुत्स्थः सीतया सहितः सुखम् ॥४०॥

**पदविभाग:**

ततः सर्वजन आनन्दं कुर्वाणः चेष्टितैः स्वकैः । ताम् अध्युवास काकुत्स्थः सीतया सहितः सुखम्

**अन्वय:**

ततः स्वकैः चेष्टितैः सर्वजन आनन्दं कुर्वाणः काकुत्स्थः ताम् (अयोध्यां) सीतया सहितः सुखम् अध्युवास ।

**तात्पर्यम्**

पश्चात् स्वकैः चेष्टितैः सर्वजन आनन्दं कुर्वाणः अयोध्यां प्राप्य राम: सीतया सहितः सुखम् अध्युवास ।

**व्याकरणम्**

♦**सन्धि:**

सर्वजन+ आनन्दं - सवर्णदीर्घसन्धि:
कुर्वाणः + चेष्टितैः - विसर्गसकार:

♦**तद्धितान्ता:**
ककुत्स्थस्य गोत्रापत्यं पुमान् - काकुत्स्थ: - राम:

**॥ इति श्रीरामोदन्ते बालकाण्ड: समाप्त: ॥**

# श्री रामोदन्त: बालकाण्ड: संक्षेप:

अहं श्रीवत्स अङ्कित वक्षसम्  श्रीपतिं विष्णुं नमस्कृत्य श्री वाल्मीकिना पूर्वं उक्तं श्रीरामोदन्तं नाम कथां वदिष्यामि ।

पूर्वं विश्रवस: नाम मुनि: आसीत् । स: पुलसत्यस्य पुत्र: । विश्रवस: मुनये कलत्रद्वयमासीत् । ते नाम कैकसी इडाविडा । रावण: कुम्भकर्ण: विभिषण: च कैकेसीया: पुत्रा: । सूर्पनखा तेषाम् सहोदरी । कुबेर: इडाविडाया: पुत्र: आसीत् । रावण: तस्य अनुजौ सह तपस् आश्रितवान् । अत: तेषां मध्ये ब्रह्मा प्रत्यक्षीकृतवान् । तत: ते इष्टान् वरान् वव्रिरे । रावण: मानुषादन्यै: अवध्यत्वं वरं प्रापतवान् । तस्य सहोदर: कुम्भकर्ण: निर्देवत्व भावं इच्छया स: निद्रावत्वं वरं प्राप्तवान् । अत: स: सर्वदा निद्रां कृतवान्। रावणस्य सहोदर: विभीषण: स: सत्वगुण सम्पन्न: आसीत् । स: विष्णुभक्तिं प्रार्थीतवान् । तेभ्य: (रावण: कुम्भकर्ण: विभीषण: )एतान् वरान् दत्वा ब्रह्मा तत्रैव अन्तर्दधे । तदनन्दरं स: लङ्कापुरीं गतवान् । तत्र स: धनाधिपतिं जित्वा पुष्पकविमानं च हत्वा तत्रैव सुखम् अवसत् ।

राक्षसा: पाताललोके अवसन् । यदा रावण: कुबेरं जित्वा लङ्काम् अवसत् तदा ते रावणं समाश्रित्य लङ्का नगरे सुखम् अवसन् । मय नाम एक: राक्षस: आसीत् । स: असुराणां नायक: । तस्य पुत्री मन्दोदरी । दशानन: रावण: ताम् विवाहं कृतवान् । पश्चात् मेघनाद नाम सुतं उत्पादयामास । लङ्गा नृप: रावण: रसां पातालं च जीतवान् । पश्चात् स: सर्वान् लोकान् आक्रमयन् महिला: च अपहरितवान् । रावण: वैदिककर्मं दूषितवान् । द्विजान् अर्दयति स्म । पश्चात् तस्य पुत्रेण युद्धे इन्द्रम् अपि अपीडयत् ।रावण: तस्य किङ्करै: कल्पकवृक्ष: पुन: आनाय्य स्थापितवान् । अत: स: लङ्कायां बहुकालम् अवसत् । पश्चात् तस्मिन समये देवा: ब्रह्मा समीपे गत्वा रावणस्य विचेष्टितम् सर्वं उक्तवन्त: । यदा देवा: विधातारम् उक्तवन्त: तदा स: तत् श्रृत्वा सुरै: सह दुग्धोदधे: तटम् प्राप्य श्रीमहाविष्णुम् नानाविध स्तवै: सन्तुष्टवान् । अत्र महाविष्णु: तेषां मध्ये आविर्भूय *"पितामह ! त्वं किमर्थम् देवगणै: सह अत्र अगत:"* इति पृष्टवान् ।

पश्चात् ब्रह्मा रावणात् पीडाम् अवदत् । तत् श्रुत्वा श्रीविष्णु: हर्षयन् धातारम् अवदत् । "हे अज! भयम् मास्तु । त्वं देवगणै: सह गच्छ । अहं दशरथस्य पुत्ररूपेण जनित्वा दशाननं हनिष्यामि । सर्वे देवा: अपि आत्मांशै: च भूमौ रावणनिग्रहे मम साहाय्यं कर्तुं वानररूपिण: (इव) जायेरन् " । महाविष्णु: एवं समाधान वाक्यम् उक्तवा तत्र एव अन्तर्गत: । महाविष्णो: वाक्येन सन्तुष्ट ब्रह्मा सन्तोषेण देवा: सह प्रायात् । पश्चात् इन्द्र: वालिनं नाम वानरम् अजीजनत् । सूर्य: सुग्रीवम् नाम अजीजनत् । वायु: हनुमन्तं च नाम अजीजनत् । ब्रह्मा पुरा एव जाम्बवन्त च जनयामास । इत्थम् अन्ये च देवा: बहून् कपिन् च अजनयन् । पश्चात् वाली वानरसङ्खानाम् परिवृढ: (नायक:) अभवत् । स: स्वस्य जनपरिवारेण सह किष्किन्धाम् अबसत् ।

सूर्यवंशे दशरथ: नाम राजा आसीत् । तस्मै कलत्रत्रयम् आसीत् । परन्तु अपि ताभ्य: सन्तान भाग्यम् न प्राप्तवन्त: । दशरथ: पुत्ररहित: आसीत् । अत: स: सुमन्त्रवचनात् सपुरोहितः ऋष्यशृङ्गं आनीय पुत्रकामेष्टिम् आरब्धवान् । दशरथ: पुत्रकामेष्टि यागम् कृतवान् । याग समये कश्चित् अग्नेः उत्थितः पायसं चरुम् गृहीत्वा त्वम् एतत् पत्नीः प्राशय इति उक्त्वा सः नृपाय अदात् । दशरथ: तत् पायसं गृहीत्वा स्वस्य पत्नी: प्राशयत् । ता: च नृपात् पायसं गृहीत्वा गर्भं अधारयन् । दशरथस्य पुत्रकामेष्टि यागस्य फलेन पूर्णे समये कौसल्या सज्जनाम्भोजानि भास्कर: इव श्री रामचन्द्रं अजीजनत् । तथा कैकेयी अपि भरतं अजीजनत् ।

ततः सुमित्रा लक्ष्मण: शत्रुघ्न: इति पुत्रद्वयं अजीजनत् । पश्चात् राजा दशरथ: द्विजैः तेषां जातकर्मादिकं अकारयत् । ते (राम: लक्ष्मण: भरत: सत्रुघ्न:) अन्योनयेन वर्धन्ते । ते सर्वे सकलासु च विद्यासु नैपुण्यम् प्राप्तवन्त । पश्चात् विश्वामित्र मुनि: आगत्य तस्य यज्ञ रक्षणार्थं शक्तिधर उपमम् रामं प्रेषयतु इति अयाचत् । अत: राजा दशरथ: वसिष्ठस्य वचनात् लक्ष्मणेन सह रामं कृच्छ्रेण कौशिकस्य करे ददौ । पश्चात् विश्वामित्र: रामलक्ष्मणौ गृहीत्वा गच्छन् ताभ्यां बला अतिबला मन्त्रद्वयम् च सर्वाणि अस्त्राणि च उपदिदेश ।

धीमान् सलक्ष्मणः रामः कौशिकेन प्रचोदितः लोकपीडन तत्पराम् ताटकाम् अवधीत् । पश्चात् रामः कौशिकेन सह सिद्धाश्रमं प्राप्तवान् । तत्र कौशिकः यागं आरब्धवान् । अतः राक्षसाः च तत्र समागमन् । पश्चात् रामः मारीचम् अस्त्रेण अर्णवे क्षिप्तवान् । अतः सुबाहु प्रमुखान् च हत्वा कौसिक मुनेः यज्ञं च अपालयत् । यज्ञरक्षणानन्दरं कौशिकेन नीयमानः रामः सहानुजः अहल्यायाः शापं निर्मोक्षं कृतवान् अतः मिथिलां गत्वा जनकं सम्प्राप । यदा रामः मिथिलां प्राप्तवान् तदा सः जनकेन अर्चितः । अतः कौशिकेन प्रचोदितः सीतानिमित्तमानीतं ऐश्वरं धनुः बभञ्ज ।

ततः मिथिलाधिपः जनकः दशरथं दूतैः आनाय्य तस्य पुत्रेभ्यः रामादिभ्यः (रामः लक्ष्मणः भरतः शत्रघ्नः) सीताद्याः (सीता ऊर्मिला माण्डवी श्रुतकीर्तिः) कन्यकाः ददौ । ततः गुरु नियोगेन कृत विवाहः राघवः सहानुजः तेन जनकेन उरुमानितः निर्ययौ। । तत् धनुर्भङ्गम् आकर्ण्य आयान्तं रोषभीषणम् परशुरामम् विजित्य राघवः अयोध्यां गतवान् । पश्चात् स्वकैः चेष्टितैः सर्वजन आनन्दं कुर्वाणः अयोध्यां प्राप्य रामः सीतया सहितः सुखम् अध्युवास ।

**॥ इति श्रीरामोदन्ते बालकाण्डः समाप्तः ॥**



# ॥ श्रीरामोदन्तः ॥

## ॥ अथ अयोध्याकाण्डः ॥

**मूल श्लोक:**

**एतस्मिन्नन्तरे गेहं मातुलस्य युधाजितः ।**
**प्रययौ भरतः प्रीतः शत्रुघ्नेन समन्वितः ॥१॥**

**पदविभाग:**

एतस्मिन् अन्तरे गेहं मातुलस्य युधाजितः प्रययौ भरतः प्रीतः शत्रुघ्नेन समन्वितः

**अन्वय:**

एतस्मिन् अन्तरे भरतः शत्रुघ्नेन समन्वितः प्रीतः मातुलस्य युधाजितः गेहं प्रययौ ।

**तात्पर्यम्**

कैकेय देशस्य नृप: युधाजित् । स: भरतस्य मातुल: । एतस्मिन् अन्तरे भरतः शत्रुघ्नेन सह युधाजितः गेहं प्रययौ ।

**व्याकरणम्**

♦सन्धि:

एतस्मिन् + अन्तरे - ङमुडागमनसन्धि:

*ययौ - या धातु: लिट् लकार: प्रथमपुरुष: ययौ-ययतु:-ययु:*

**मूल श्लोक:**

**ततः प्रकृतिभिः साकं मन्त्रयित्वा स भूपतिः ।**
**अभिषेकाय रामस्य समारेभे मुदान्वितः ॥२॥**

**पदविभाग:**

ततः प्रकृतिभिः साकं मन्त्रयित्वा सः भूपतिः अभिषेकाय रामस्य समारेभे मुदान्वितः

**अन्वय:**

ततः स भूपतिः मुदान्वितः प्रकृतिभिः साकं मन्त्रयित्वा रामस्य अभिषेकाय समारेभे ।

**तात्पर्यम्**

पश्चात् स: भूपतिः दशरथ:सन्तोषेण प्रकृतिभिः साकं मन्त्रयित्वा रामस्य अभिषेकाय समारेभे ।

**व्याकरणम्**

♦ सन्धि:

सः + भूपतिः - विसर्ग लोप:

♦ कृदन्ता:

मन्त्रयित्वा - मन्त्र् धातु: + क्त्वा प्रत्यय:

**मूल श्लोक:**

**कैकेयी तु महीपालं मन्थरादूषिताशया ।**
**वरद्वयं पुरा दत्तं ययाचे सत्यसङ्गरम् ॥३॥**

**पदविभाग:**

कैकेयी तु महीपालं मन्थरादूषिताशया वरद्वयं पुरा दत्तं ययाचे सत्यसङ्गरम्

**अन्वय:**

कैकेयी तु मन्थरादूषिताशया महीपालं सत्यसङ्गरम् पुरा दत्तं वरद्वयं ययाचे ।

**तात्पर्यम्**

परन्तु कैकेयी मन्थरादूषिताशया महीपालं सत्यसङ्गरम् दशरथं पुरा दत्तं वरद्वयं ययाचे ।

**व्याकरणम्**

♦ समास:

मन्थरया दूषित: आशय: यस्या: सा - मन्थरादूषिताशया – व्यधिकरणबहुव्रीहिः

सत्य: सङ्कर: यस्य स: - सत्यसङ्कर: - समानाधिकरणबहुव्रीहिः

**मूल श्लोक:**

**वनवासाय रामस्य राज्याप्त्यै भरतस्य च ।**
**तस्या वरद्वयं कृच्छ्रमनुजज्ञे महीपतिः ॥४॥**

**पदविभाग:**

वनवासाय रामस्य राज्याप्त्यै भरतस्य च तस्या: वरद्वयं कृच्छ्रम् अनुजज्ञे महीपतिः

**अन्वय:**

रामस्य वनवासाय, भरतस्य च राज्याप्त्यै तस्याः कृच्छ्रं वरद्वयं महीपतिः अनुजज्ञे ।

**तात्पर्यम्**

कैकेयी दशरथं वरद्वयं ययाचे । रामस्य वनवासम् भरतस्य च राज्याप्ति: च ।
तस्याः कृच्छ्रं वरद्वयं महीपतिः अनुजज्ञे ।

**व्याकरणम्**

♦ सन्धि:

तस्या: + वरद्वयम् - विसर्गलोप:

♦ समास:

राज्यस्य आप्ति: राज्याप्ति: - षष्ठितत्पुरुष: तस्यै - राज्याप्त्यै

*अनुजज्ञे - अनु + ज्ञा धातु: कर्मणि प्रथमपुरुष: एकवचनम्*

**मूल श्लोक:**

**रामं तदैव कैकेयी वनवासाय चादिशत् ।**
**अनुज्ञाप्य गुरून्सर्वान्निर्ययौ च वनाय सः ॥५॥**

**पदविभाग:**

रामं तदा एव कैकेयी वनवासाय च आदिशत्  अनुज्ञाप्य गुरून् सर्वान् निर्ययौ च वनाय सः

**अन्वय:**

तदा एव कैकेयी रामं वनवासाय च आदिशत् । सः गुरून् सर्वान् अनुज्ञाप्य च वनाय निर्ययौ ।

**तात्पर्यम्**

कैकेयी रामस्य वनवासं भरतस्य राज्याप्ति: च राजा दशरथं अयाचत् । तदा एव कैकेयी रामं वनवासाय च आदिशत् । सः राम: गुरून् सर्वान् अनुज्ञाप्य च वनाय निर्ययौ ।

**व्याकरणम्**

♦सन्धि:
तदा + एव - वृद्धिसन्धि:
च + आदिशत् - सवर्णदीर्घसन्धि:

अनुज्ञाप्य - अनु + ज्ञा + ल्यप् प्रत्यय:
*निर्ययौ - निर् + ययौ   ययौ - या धातु: लिट् लकार: प्रथमपुरुष:  ययौ ययतुः ययुः*

**मूल श्लोक:**

**दृष्ट्वा तं निर्गतं सीता लक्ष्मणश्चानुजग्मतुः।**
**सन्त्यज्य स्वगृहान्सर्वे पौराश्चानुययुर्द्रुतम्॥६॥**

**पदविभाग:**

दृष्ट्वा तं निर्गतं सीता लक्ष्मणः च अनुजग्मतुः सन्त्यज्य स्वगृहान् सर्वे पौराः च अनुययुः द्रुतम्

अन्वय:

तं निर्गतं दृष्ट्वा सीता लक्ष्मणः च अनुजग्मतुः। सर्वे पौराः च स्वगृहान् सन्त्यज्य द्रुतम् अनुययुः।

**तात्पर्यम्**

कैकेय्या: प्रियकारणात् राम: वनाय निर्ययौ । तं निर्गतं रामं दृष्ट्वा सीता लक्ष्मणः च अनुजग्मतुः। सर्वे जना: च स्वगृहान् सन्त्यज्य द्रुतम् अनुययुः।

**व्याकरणम्**

♦सन्धि:

लक्ष्मणः + च - विसर्गसकार: च + अनुजग्मतुः - सवर्णदीर्घसन्धि:
पौराः + च - विसर्गसकार: च + अनुययुः - सवर्णदीर्घसन्धि:
अनुययुः + द्रुतम् - विसर्गरेफ:

*अनुजग्मतुः- अनु+जग्मतु: गम् धातु: लिट लकार: प्रथमपुरुष; जगाम जग्मतु: जग्मु:*
*अनुययुः- अनु+ ययु: या धातु: लिट् लकार: प्रथमपुरुष: ययौ ययतुः ययुः*

**मूल श्लोक:**

**वञ्चयित्वा कृशान् पौरान् निद्राणान् निशि राघवः ।**
**वाहयमानं सुमन्त्रेण रथमारुह्य चागमत् ॥७॥**

**पदविभाग:**

वञ्चयित्वा कृशान् पौरान् निद्राणान् निशि राघवः वाहयमानं सुमन्त्रेण रथम् आरुह्य च अगमत्

**अन्वय:**

राघवः तु निशि निद्राणान् कृशान् पौरान् वञ्चयित्वा सुमन्त्रेण वाहयमानं रथम् आरुह्य च अगमत् ।

**तात्पर्यम्**

रामेण सह पौराः गतवन्तः । परन्तु राघवः तु निशि निद्राणान् कृशान् पौरान् वञ्चयित्वा सुमन्त्रेण वाहयमानं रथम् आरुह्य च गतवान् ।

**व्याकरणम्**

♦सन्धि:

च + अगमत् - सवर्णदीर्घसन्धि:

**मूल श्लोक:**

**श्रृङ्गिबेरपुरं गत्वा गङ्गाकूलेऽथ राघवः ।**
**गुहेन सत्कृतस्तत्र निशामेकामुवास च ॥८॥**

**पदविभाग:**

श्रृङ्गिबेरपुरं गत्वा गङ्गाकूले अथ राघवः गुहेन सत्कृतः तत्र निशाम् एकाम् उवास च

**अन्वय:**

अथ राघवः गङ्गाकूले श्रृङ्गिबेरपुरं गत्वा गुहेन सत्कृतः तत्र एकाम्
निशाम् उवास च ।

**तात्पर्यम्**

अथ राघवः गङ्गाकूले श्रृङ्गिबेरपुरं गतवान् । तत्र गुहं मिलितवान् । तत्र निशाम्
एकाम् उवास च ।

**व्याकरणम्**

♦सन्धि:
गङ्गाकूले + अथ - पूर्वरूपसन्धि:
सत्कृत: + तत्र - विसर्ग सकार:

♦कृदन्ता:
गत्वा - गम् + क्त्वा प्रत्यय:

*उवास - वस् धातु: लिट् लकार: प्रथमपुरुष: उवास ऊषतु: ऊषु:*

**मूल श्लोक:**

**सारथिं संनिमन्त्र्यासौ सीतालक्ष्मणसंयुतः ।**
**गुहेनानीतया नावा सन्ततार च जाह्नवीम् ॥९॥**

**पदविभाग:**

सारथिं संनिमन्त्र्य असौ सीता-लक्ष्मण-संयुतः गुहेन आनीतया नावा सन्ततार च जाह्नवीम्

**अन्वय:**

असौ सीतालक्ष्मणसंयुतः सारथिं संनिमन्त्र्य गुहेन आनीतया नावा जाह्नवीम् च सन्ततार ।

**तात्पर्यम्**

सीतालक्ष्मणसंयुतः श्रीराम: सारथिं सुमन्त्रं संनिमन्त्र्य गुहेन आनीतया नावा गङ्गां च सन्ततार ।

**व्याकरणम्**

♦सन्धि:

संनिमन्त्र्य + असौ - सवर्णदीर्घसन्धि:

गुहेन + आनीतया - सवर्णदीर्घसन्धि:

♦कृदन्ता:

संनिमन्त्र्य - सम् + नि + मन्त्र् + ल्यप्

*संततार - सं + ततार*

*ततार - तॄ धातु: लिट् लकार: प्रथमपुरुष: ततार तेरतु: तेरु:*

**मूल श्लोकः**

**भरद्वाजमुनिं प्राप्य तं नत्वा तेन सत्कृतः ।**
**राघवस्तस्य निर्देशाच्चित्रकूटेऽवसत्सुखम् ॥१०॥**

**पदविभागः**

भरद्वाजमुनिं प्राप्य तं नत्वा तेन सत्कृतः राघवः तस्य निर्देशात् चित्रकूटे अवसत् सुखम्

**अन्वयः**

राघवः भरद्वाजमुनिं प्राप्य तं नत्वा तेन सत्कृतः तस्य निर्देशात् चित्रकूटे सुखम् अवसत् ।

**तात्पर्यम्**

पश्चात् रामः भरद्वाजस्य आश्रमं गतवान् । तत्र तं नत्वा तेन सत्कृतः तस्य निर्देशात् चित्रकूटे सुखम् अवसत् ।

**व्याकरणम्**

♦ सन्धिः

राघवः + तस्य - विसर्गसकारः
निर्देशात् + चित्रकूटे - श्चुत्वसन्धिः
चित्रकूटे + अवसत् - पूर्वरूपसन्धिः

**मूल श्लोक:**

**अयोध्यां तु ततो गत्वा सुमन्त्रः शोकविह्वलः ।**
**राज्ञे न्यवेदयत्सर्वं राघवस्य विचेष्टितम् ॥११॥**

**पदविभाग:**

अयोध्यां तु ततः गत्वा सुमन्त्रः शोकविह्वलः राज्ञे न्यवेदयत् सर्वं राघवस्य विचेष्टितम्

**अन्वय:**

ततः सुमन्त्रः तु शोकविह्वलः अयोध्यां गत्वा राज्ञे सर्वं राघवस्य विचेष्टितं न्यवेदयत् ।

**तात्पर्यम्**

पश्चात् सुमन्त्रः तु शोकेन अयोध्यां गतवान् । तत्र राज्ञे दशरथे राघवस्य विचेष्टितं सर्वं उक्तवान् ।

**व्याकरणम्**

♦सन्धि:
ततः + गत्वा - विसर्गउकार:

♦ समास:
शोकेन विह्वल: - शोकविह्वल: तृतीयातत्पुरुष:

**मूल श्लोक:**

**तदाकर्ण्य सुमन्त्रोक्तं राजा दुःखविमूढधीः ।**
**राम रामेति विलपन्देहं त्यक्त्वा दिवं ययौ ॥१२॥**

**पदविभाग:**

तदा आकर्ण्य सुमन्त्रोक्तं राजा दुःखविमूढधीः । राम राम इति विलपन् देहं त्यक्त्वा दिवं ययौ

**अन्वय:**

तदा सुमन्त्रोक्तम् आकर्ण्य दुःखविमूढधीः राजा राम राम इति विलपन् देहं त्यक्त्वा दिवं ययौ ॥

**तात्पर्यम्**

सुमन्त्रः राज्ञे दशरथे राघवस्य विचेष्टितं सर्वं उक्तवान् । तदा आकर्ण्य दुःखविमूढधीः राजा दशरथ: राम राम इति विलपन् देहं त्यक्त्वा स्वर्गं गत: ।

**व्याकरणम्**

♦सन्धि:

तदा + आकर्ण्य - सवर्णदीर्घसन्धि:

राम + इति - गुणसन्धि:

♦ समास:

दुःखविमूढधीः - दु:खेन विमूढा: धी: यस्य स: -व्यधिकरणबहुव्रीहिसमास:

♦ कृदन्ता:

त्यक्त्वा - त्यज् + क्त्वा प्रत्यय:

*ययौ - या धातु: लिट् लकार: प्रथमपुरुष: ययौ ययतु: ययु:*

**मूल श्लोक:**

**मन्त्रिणस्तु वसिष्ठोक्त्या देहं संरक्ष्य भूपतेः ।**
**दूतैरानाययामासु: भरतं मातुलालयात् ॥१३॥**

**पदविभाग:**

मन्त्रिणः तु वसिष्ठोक्त्या देहं संरक्ष्य भूपतेः दूतैः आनाययामासु: भरतं मातुल: आलयात्

**अन्वय**:

मन्त्रिणः तु वसिष्ठोक्त्या भूपतेः देहं संरक्ष्य दूतैः भरतं मातुल आलयात् आनाययामासु: ।

**तात्पर्यम्**

दशरथ: राम राम इति विलपन् स्वर्गं गत: । पश्चात् मन्त्रिणः तु वसिष्ठोक्त्या भूपतेः देहं संरक्षितवन्त: । दूतैः भरतं मातुलस्य आलयात् आनाययामासु: ।

**व्याकरणम्**

♦सन्धि:

मन्त्रिणः + तु - विसर्गसकार:

दूतैः + आनाययामासु: विसर्गरेफ:

♦ समास:

मातुलालयात् - मातुलस्य आलयात् - षष्ठीतत्पुरुष:

वसिष्ठस्य उक्ति: तया - वसिष्ठोक्त्या

♦ कृदन्ता:

संरक्ष्य - सम् + रक्ष् + ल्यप् प्रत्यय:

*आनाययामासु: - आ + नी धातु: + णिच् + लिट् लकार: प्रपु बहु*

**मूल श्लोक:**

**भरतस्तु मृतं श्रुत्वा पितरं कैकयीगिरा ।**
**संस्कारादि चकारास्य यथाविधि सहानुजः ॥१४॥**

**पदविभाग:**

भरतः तु मृतं श्रुत्वा पितरं कैकयीगिरा संस्कारादि चकार अस्य यथाविधि सहानुजः

**अन्वय:**

भरतः तु पितरं कैकयीगिरा मृतं श्रुत्वा सहानुजः अस्य यथाविधि संस्कारादि चकार ।

**तात्पर्यम्**

भरत: कैकय्या: वरकारणात् पिता दशरथ: मृत: इति आकर्ण्य तस्य अनुजेन सह यथाविधि संस्कारादि चकार ।

**व्याकरणम्**

♦ सन्धि:

भरत: + तु - विसर्गसकार: चकार + अस्य - सवर्णदीर्घसन्धि:

♦ समास:

सहानुज: - अनुजेन सह वर्तते इति - सहपूर्वपदकर्मधारयसमास:

यथाविधि: - विधिम् अनतिक्रम्य - अव्ययीभावसमास:

कैकेय्या: गी: - षष्ठीतत्पुरुष: तया - कैकयीगिरा -

♦ कृदन्ता:

श्रुत्वा - श्रु + क्त्वा प्रत्यय:

*चकार - कृ धातु: लिट् लकार: प्रथमपुरुष: चकार चक्रतु: चक्रु:*

**मूल श्लोक:**

**अमात्यैश्चोद्यमानोऽपि राज्याय भरतस्तदा ।**
**वनायैव ययौ राममानेतुं नागरैः सह ॥१५॥**

**पदविभाग:**

अमात्यैः चोद्यमानः अपि राज्याय भरतः तदा वनाय एव ययौ रामम् आनेतुं नागरैः सह

**अन्वय:**

तदा भरतः अमात्यैः राज्याय चोद्यमानः अपि रामम् आनेतुं नागरैः सह वनाय एव ययौ ।

**तात्पर्यम्**

तदा भरतः अमात्यैः राज्याय चोद्यमानः अपि स: न ऐच्छत् । स: रामम् आनेतुं नगरस्य जनै: सह वनाय एव ययौ ।

**व्याकरणम्**

♦सन्धि:

अमात्यैः + चोद्यमानः - विसर्गसकार: चोद्यमानः + अपि - विसर्गउकार: पूर्वरूपसन्धि:

भरतः + तदा -विसर्गसकार: वनाय + एव - वृद्धिसन्धि:

♦ कृदन्ता:

आनेतुम् - आ+ नी+ तुमुन् प्रत्यय:

*नगरे भवा: नागरा: - तै: नागरै:*

*ययौ - या धातु: लिट् लकार: प्रथमपुरुष: ययौ ययतु: ययु:*

**मूल श्लोक:**

**स गत्वा चित्रकूटस्थं रामं चीरजटाधरम् ।**
**ययाचे रक्षितुं राज्यं वसिष्ठाद्यैर्द्विजैः सह ॥१६॥**

**पदविभाग:**

सः गत्वा चित्रकूटस्थं रामं चीरजटाधरम् ययाचे रक्षितुं राज्यं वसिष्ठाद्यैः द्विजैः सह

**अन्वय**:
सः वसिष्ठाद्यैः द्विजैः सह गत्वा चित्रकूटस्थं चीरजटाधरम् रामं राज्यं रक्षितुं ययाचे ।

**तात्पर्यम्**
भरत: वसिष्ठाद्यैः द्विजैः सह रामं दृष्टुम् वनम गतवान् । तत्र भरत: चित्रकूटस्थं चीरजटाधरम् रामं राज्यं रक्षितुं प्रार्थितवान् ।

**व्याकरणम्**
♦ सन्धि:
स: + गत्वा - विसर्गलोप:
वसिष्ठाद्यै: + द्विजैः - विसर्गरेफ:
♦ समास:
चित्रकूटे तिष्ठति इति चित्रकूटस्थ: - उपपदसमास: - तम् - चित्रकूटस्थम्
वसिष्ठ: आद्य: येषां ते -वसिष्ठाद्य: - समानाधिकरणबहुव्रीहिसमास: - तै: वसिष्ठाद्यै:
♦कृदन्ता:
गत्वा - गम् + क्त्वा प्रत्यय:
रक्षितुम् - रक्ष् + तुमुन् प्रत्यय:

*ययाचे - याच् आत्मनेपदि धातु: लिट् लकार: प्रथमपुरुष: ययाचे ययाचाते ययाचिरे*

**मूल श्लोक:**

**चतुर्दश समा नीत्वा पुनरैष्याम्यहं पुरीम् ।**
**इत्युक्त्वा पादुके दत्वा तं रामः प्रत्ययापयत् ॥१७॥**

**पदविभाग:**

चतुर्दश समा नीत्वा पुनः एेष्यामि अहं पुरीम् इति उक्त्वा पादुके दत्वा तं रामः प्रत्ययापयत्

**अन्वय:**

अहं चतुर्दश समा नीत्वा पुनः पुरीम् ऐष्यामि इति उक्त्वा पादुके दत्वा तं रामः प्रत्ययापयत् ।

**तात्पर्यम्**

भरत: वनम् गत्वा रामं राज्यं रक्षितुं प्रार्थितवान् ।परन्तु राम: "अहं चतुर्दश समा नीत्वा पुनः तत्र ऐष्यामि " इति उक्त्वा स्वस्य पादुके दत्वा तं रामः प्रत्ययापयत् ।

**व्याकरणम्**

♦सन्धि:

पुनः + ऐष्यामि - विसर्गरेफ:        ऐष्यामि + अहं - यण् सन्धि:

इति + उक्त्वा - यण् सन्धि:

♦ कृदन्ता:

नीत्वा - नी + क्त्वा प्रत्यय:        उक्त्वा - वच् + क्त्वा - प्रत्यय:

दत्वा - दा + क्त्वा - प्रत्यय:

*आ+ एष्यामि - ऐष्यामि*

*एष्यामि- इण् धातु: लृट् लकार: उत्तमपुरुष: एष्यामि एष्याव: एष्याम:*

*प्रत्ययापयत् - प्रति + अयापयत्*

*प्रति + या धातु: + णिच् + प्रथमपुरुष: प्रत्ययापयत् प्रत्ययापयताम् प्रत्ययापयन्*

**मूल श्लोक:**

**गृहीत्वा पादुके तस्माद्भरतो दीनमानसः ।**
**नन्दिग्रामे स्थितस्ताभ्यां ररक्ष च वसुन्धराम् ॥१८॥**

**पदविभाग:**

गृहीत्वा पादुके तस्मात् भरतः दीनमानसः नन्दिग्रामे स्थितः ताभ्यां ररक्ष च वसुन्धराम्

**अन्वय:**
दीनमानसः भरतः तस्मात् पादुके गृहीत्वा नन्दिग्रामे स्थितः ताभ्यां वसुन्धरां ररक्ष च ।

**तात्पर्यम्**
राम: स्वस्य पादुके दत्वा भरतं प्रत्ययापयत् । अत: दीनमानसः भरतः तस्मात् रामस्य पादुके गृहीत्वा नन्दिग्रामे स्थितः ताभ्यां वसुन्धरां ररक्ष च ।

**व्याकरणम्**
♦सन्धि:
तस्मात् + भरतः - जश्त्वसन्धि:
भरत: + दीनमानसः - विसर्गउकार:
स्थितः + ताभ्यां - विसर्गसकार:
♦ कृदन्ता:
गृहीत्वा - ग्रह् + क्त्वा प्रत्यय: स्थित: - स्था + क्त प्रत्यय:
♦ समास:
वसूनि धारयति इति - वसुन्धरा - उपपदसमास: ताम् - वसुन्धराम्
दीनं मानसं यस्य स: - दीनमानस: - समानाधिकरणबहुव्रीहिसमास: तम् दीनमानसम्
*ररक्ष - रक्षँ धातु: लिट् लकार: प्रथमपुरुष: ररक्ष ररक्षतु: ररक्षु:*

**मूल श्लोक:**

**राघवस्तु गिरेस्तस्मात् गत्वाऽत्रिं समवन्दत ।**
**तत्पत्नी तु तदा सीतां भूषणैः स्वैरभूषयत् ॥१९॥**

**पदविभाग:**

राघवः तु गिरेः तस्मात् गत्वा अत्रिं समवन्दत तत्पत्नी तु तदा सीतां भूषणैः स्वैः अभूषयत्

**अन्वय:**

राघवः तु तस्मात् गिरेः गत्वा अत्रिं समवन्दत । तदा तत्पत्नी तु सीतां स्वैः भूषणैः अभूषयत् ।

**तात्पर्यम्**

पश्चात् राघवः तु तस्मात् गिरेः गतवान् । तत्र अत्रि: मुनिं वन्दनं कृतवान् । तदा मुने: पत्नी तु सीतां स्वैः भूषणैः अभूषयत् ।

**व्याकरणम्**

♦सन्धि:

राघव: + तु - विसर्गसकार:

गिरे: + तस्मात् - विसर्गसकार:

स्वै: + अभूषयत् - विसर्गरेफ:

♦ कृदन्ता:

गत्वा - गम् + क्त्वा प्रत्यय:

**मूल श्लोक:**

**उषित्वा तु निशामेकाम् आश्रमे तस्य राघवः ।**
**विवेश दण्डकारण्यं सीतालक्ष्मणसंयुतः ॥२०॥**

**पदविभाग:**

उषित्वा तु निशाम् एकाम् आश्रमे तस्य राघवः विवेश दण्डकारण्यं सीतालक्ष्मणसंयुतः

**अन्वय:**

राघवः तस्य आश्रमे निशाम् एकाम् उषित्वा तु सीतालक्ष्मणसंयुतः दण्डकारण्यं विवेश ।

**तात्पर्यम्**

पश्चात् राघवः मुनेः आश्रमे निशाम् एकाम् उषित्वा तु सीतालक्ष्मणसंयुतः श्रीरामः दण्डकारण्यं विवेश ।

**व्याकरणम्**

♦ कृदन्ताः
उषित्वा - उष् + क्त्वा प्रत्ययः

*विवेश विश् धातुः लिट्लकारः प्रथमपुरुषः विवेश विविशतुः विविशुः*

***॥ इति श्रीरामोदन्ते अयोध्याकाण्डः समाप्तः ॥***

## ॥ अयोध्याकाण्डः संक्षेपः ॥

कैकेय देशस्य नृप: युधाजित् । स: भरतस्य मातुल: । एतस्मिन् अन्तरे भरतः शत्रुघ्नेन सह युधाजितः गेहं प्रययौ । पश्चात् स: भूपतिः दशरथ:सन्तोषेण प्रकृतिभिः साकं मन्त्रयित्वा रामस्य अभिषेकाय समारेभे । परन्तु कैकेयी मन्थरादूषिताशया महीपालं सत्यसङ्गरम् दशरथं पुरा दत्तं वरद्वयं ययाचे । रामस्य वनवासम् भरतस्य च राज्याप्ति: च । तस्याः कृच्छ्रं वरद्वयं महीपतिः अनुजज्ञे । तदा एव कैकेयी रामं वनवासाय च आदिशत् । सः राम: गुरून् सर्वान् अनुज्ञाप्य च वनाय निर्ययौ । तं निर्गतं रामं दृष्ट्वा सीता लक्ष्मणः च अनुजग्मतुः । सर्वे जना: च स्वगृहान् सन्त्यज्य द्रुतम् अनुययुः ।परन्तु राघवः तु निशि निद्राणान् कृशान् पौरान् वञ्चयित्वा सुमन्त्रेण वाहयमानं रथम् आरुह्य च गतवान् ।

अथ राघवः गङ्गाकूले श्रृङ्गिबेरपुरं गतवान् । तत्र गुहं मिलितवान् । तत्र निशाम् एकाम् उवास च । सीतालक्ष्मणसंयुतः श्रीराम: सारथिं सुमन्त्रं संनिमन्त्र्य गुहेन आनीतया नावा गङ्गां च सन्ततार । पश्चात् राम: भरद्वाजस्य आश्रमं गतवान् । तत्र तं नत्वा तेन सत्कृतः तस्य निर्देशात् चित्रकूटे सुखम् अवसत् । पश्चात् सुमन्त्रः तु शोकेन अयोध्यां गतवान् । तत्र राज्ञे दशरथे राघवस्य विचेष्टितं सर्वं उक्तवान् । तदा आकर्ण्य दु:खविमूढधीः राजा दशरथ: राम राम इति विलपन् देहं त्यक्त्वा स्वर्गं गत: ।

पश्चात् मन्त्रिणः तु वसिष्ठोक्त्या भूपतेः देहं संरक्षितवन्त: । दूतैः भरतं मातुलस्य आलयात् आनाययामासु: । भरत: कैकय्या: वरकारणात् पिता दशरथ: मृत: इति आकर्ण्य तस्य अनुजेन सह यथाविधि संस्कारादि चकार । तदा भरतः अमात्यैः राज्याय चोद्यमानः अपि स: न ऐच्छत् । स: रामम् आनेतुं नगरस्य जनै: सह वनाय एव ययौ । तत्र भरत: चित्रकूटस्थं चीरजटाधरम् रामं राज्यं रक्षितुं प्रार्थितवान् । परन्तु राम: "अहं चतुर्दश समा नीत्वा पुनः तत्र ऐष्यामि " इति उक्त्वा स्वस्य पादुके दत्वा तं रामः प्रत्ययापयत् ।

अत: दीनमानसः भरतः तस्मात् रामस्य पादुके गृहीत्वा नन्दिग्रामे स्थितः ताभ्यां वसुन्धरां ररक्ष च । पश्चात् राघवः तु तस्मात् गिरेः गतवान् । तत्र अत्रि: मुनिं

वन्दनं कृतवान् । तदा मुनेः पत्नी तु सीतां स्वैः भूषणैः अभूषयत् । पश्चात् राघवः मुनेः आश्रमे निशाम् एकाम् उषित्वा तु सीतालक्ष्मणसंयुतः श्रीरामः दण्डकारण्यं विवेश

***॥ इति श्रीरामोदन्ते अयोध्याकाण्डः संक्षेपः समाप्तः ॥***



# ॥ श्रीरामोदन्तः ॥

## ॥ अथ आरण्यकाण्डः ॥

## मूल श्लोक:

**व्रजन्वनेन काकुत्स्थो विराधं विधिचोदितम् ।**
**सदारानुजमात्मानं हरन्तमवधीत्तदा ॥१॥**

## पदविभाग:

व्रजन् वनेन काकुत्स्थः विराधं विधिचोदितम् सदारानुजम् आत्मानं हरन्तम् अवधीत् तदा

## अन्वय:

काकुत्स्थः वनेन व्रजन् विधिचोदितं विराधं सदारानुजम् आत्मानं हरन्तं तदा अवधीत् ।

## तात्पर्यम्

विराध: नाम राक्षस: वने व्रजत: रामलक्ष्मणौ च सीता च हतवान् । तदा राम: विराधम् अवधीत् ।

## व्याकरणम्

♦ सन्धि:

काकुत्स्थ: + विराधं - विसर्गउकार:

♦ समास:

विधिना चोदित: - विधिचोदित: - तृतीयातत्पुरुष: तम्
दाराश्च अनुजश्च - दारानुजा: - इतरेतरद्वन्द्वसमास:
दारानुजै: सह वर्तते इति सदारानुज: - सहपूर्वपदकर्मधारयसमास: - तम्

*अवधीत् - हन् धातु: लुङ् लकार: प्रथमपुरुष: अवधीत् अवधिष्टाम् अवधिषु:*
*दारा: - नित्य पुल्लिङ्ग: बहु वचनम् = भार्या*

**मूल श्लोक:**

**शरभङ्गाश्रमं प्राप्य स्वर्गतिं तस्य वीक्ष्य सः ।**
**प्रतिजज्ञे राक्षसानां वधं मुनिभिरर्थितः ॥२॥**

**पदविभाग:**
शरभङ्गाश्रमं प्राप्य स्वर्गतिं तस्य वीक्ष्य सः प्रतिजज्ञे राक्षसानां वधं मुनिभिः अर्थितः

**अन्वय:**

सः शरभङ्गाश्रमं प्राप्य तस्य स्वर्गतिं वीक्ष्य मुनिभिः अर्थितः राक्षसानां वधं प्रतिजज्ञे ।

**तात्पर्यम्**

पश्चात् राम: शरभङ्गाश्रमं गतवान् । तत्र स: मुनिं नमस्कृतवान् । स: "राम! भवत: दर्शनेन अहं भाग्यं प्राप्तवान् । भवान् अत्रत: सुतीक्षणमुने: आश्रमं गच्छ! स: मुनि: तुभ्यं मार्गं दर्शयति" इत्युक्त्वा हामाग्नौ स्वस्य शरीरं त्यक्तवान् । अत: अनेक ऋषय: आागत्य राक्षसाणां पीडनम् अवदन् । अत: राम: "राक्षसान् वधं करिष्यामि" इति प्रतिज्ञां दत्तवान् ।

**व्याकरणम्**

♦ सन्धि:
मुनिभि: + अर्थित: - विसर्गरेफ:
♦ कृदन्ता:
प्राप्य - प्र + आप् + ल्यप् प्रत्यय:
वीक्ष्य - वि + ईक्ष् +ल्यप् प्रत्यय:

*प्रतिजज्ञे - प्रति + जज्ञे जनँ धातु: लिट् लकार: प्रथमपुरुष: जज्ञे जज्ञाते जज्ञिरे*
*स्वर्गतिं - स्वर्गगमनम्*

**मूल श्लोक:**

**तस्माद्गत्वा सुतीक्ष्णं च प्रणम्यानेन पूजितः ।**
**अगस्त्यस्याश्रमं प्राप्य तं ननाम रघूत्तमः ॥३॥**

**पदविभाग:**

तस्मात् गत्वा सुतीक्ष्णं च प्रणम्य अनेन पूजितः । अगस्त्यस्य आश्रमं प्राप्य तं ननाम रघूत्तमः

**अन्वय:**

तस्मात् सुतीक्ष्णं गत्वा, प्रणम्य च अनेन पूजितः रघूत्तमः अगस्त्यस्य आश्रमं प्राप्य तं ननाम ।

**तात्पर्यम्**

तस्मात् राम: सुतीक्ष्णस्य आश्रमं गत्वा तं नमस्कृतवान् । एवम् अनेक मुनीन् नमस्कृत्य रघूत्तमः अगस्त्यस्य आश्रमं प्राप्य तं ननाम ।

**व्याकरणम्**

♦ सन्धि:

तस्मात् + गत्वा - जश्त्वसन्धि:

सुतीक्ष्णं + च - अनुस्वारसन्धि:

प्रणम्य + अनेन - सवर्णदीर्घसन्धि:

♦ समास:

रघूणाम् उत्तम: - रघूत्तम: - षष्ठीतत्पुरुष:

♦ कृदन्ता:

प्रणम्य - प्र + नम् + ल्यप् प्रत्यय:

प्राप्य - प्र + आप् + ल्यप् प्रत्यय:

*ननाम - नम् धातु: लिट् लकार: प्रथमपुरुष: ननाम नेमतु: नेमु:*

**मूल श्लोक:**

**रामाय वैष्णवं चापमैन्द्रं तूणीयुगं तथा ।**
**ब्राह्मं चास्त्रं च खड्गं च प्रददौ कुम्भसम्भवः ॥४॥**

पदविभाग:
रामाय वैष्णवं चापम् ऐन्द्रं तूणीयुगं तथा ब्राह्मं च अस्त्रं च खड्गं च प्रददौ कुम्भसम्भवः

**अन्वय:**
कुम्भसम्भवः रामाय वैष्णवं चापम् ऐन्द्रं तूणीयुगं तथा ब्राह्मं च अस्त्रं च खड्गं च प्रददौ ।

**तात्पर्यम्**
राम: अगस्त्याश्रमं गत्वा तं नमस्कृतान् । अत: कुम्भसम्भवः (अगस्त्य:) रामाय वैष्णवं चापम् ऐन्द्रं तूणीयुगं तथा ब्राह्मं अस्त्रं च खड्गं च प्रददौ ।

व्याकरणम्
♦ सन्धि:
च + अस्त्रम् - सवर्णदीर्घसन्धि:
♦ समास:
कुम्भात् सम्भव: यस्य स: -कुम्भसम्भवः - व्यधिकरणबहुव्रीहिसमास:
तूण्यो: युंगम् – तूणीयुंगम् - षष्ठीतत्पुरुष:
♦ तद्धितान्ता:
विष्णो: इदम् - वैष्णवम् इन्द्रस्य इदम् - ऐन्द्रम्
ब्रह्मण: इदम् - ब्राह्मम्
प्रददौ - प्र + ददौ
*ददौ - दा धातु: लिट् लकार: प्रथमपुरुष: ददौ ददतु: ददु:*

**मूल श्लोकः**

**ततः स गच्छन्काकुत्स्थः समागम्य जटायुषम् ।**
**वैदेह्याः पालनायैनं श्रद्दधे पितृवल्लभम् ॥५॥**

**पदविभागः**

ततः स गच्छन् काकुत्स्थः समागम्य जटायुषम् वैदेह्याः पालनाय एनं श्रद्दधे पितृवल्लभम्

**अन्वयः**

ततः सः काकुत्स्थः गच्छन् जटायुषम् समागम्य वैदेह्याः पालनाय एनं पितृवल्लभं श्रद्दधे ।

**तात्पर्यम्**

पश्चात् काकुत्स्थः रामः गच्छन् जटायुषम् समागम्य वैदेह्याः पालनाय एनं पितृवल्लभं श्रद्दधे ।

**व्याकरणम्**

♦ सन्धिः

सः + गच्छन् - विसर्गलोपः पालनाय + एनं - वृद्धिसन्धिः

♦ समासः

पितुः वल्लभः - पितृवल्लभः - षष्ठीतत्पुरुषः तम् पितृवल्लभम्

♦ कृदन्ताः

समागत्य - सम् + आ + गम् + ल्यप् प्रत्ययः

♦ तद्धितान्ताः

विदेहस्य इयम् - वैदेही

*श्रद्दधे - श्रत् + दधे दधे - धा धातुः लिट् लकारः प्रथमपुरुषः दधे दधाते दधिरे*

**मूल श्लोकः**

**ततः पञ्चवटीं प्राप्य तत्र लक्ष्मणनिर्मिताम् ।**
**पर्णशालामध्युवास सीतया सहितः सुखम् ॥६॥**

**पदविभागः**

ततः पञ्चवटीं प्राप्य तत्र लक्ष्मणनिर्मिताम् पर्णशालाम् अध्युवास सीतया सहितः सुखम्

**अन्वयः**

ततः पञ्चवटीं प्राप्य तत्र लक्ष्मणनिर्मितां पर्णशालाम् सीतया सहितः सुखम् अध्युवास ।

**तात्पर्यम्**

ततः रामः पञ्चवटीं प्राप्तवान् । तत्र लक्ष्मणः पर्णशालाम् निर्माणं कृतवान् । तत्र रामः सीतया सहितः सुखम् अध्युवास ।

**व्याकरणम्**

♦ समासः

पञ्चवटी - पञ्चानां वटानाम् समाहारः - द्विगुसमासः

लक्ष्मणनिर्मितां - लक्ष्मणेन निर्मिताम् - तृतीयातत्पुरुषः

♦ कृदन्ताः

प्राप्य - प्र + आप् + ल्यप् प्रत्ययः

*अध्युवास अधि + ववास*

*ववास - वस् धातुः लिट् लकारः प्रथमपुरुषः ववास ववसतुः ववसुः*

**मूल श्लोक:**

**तत्राभ्येत्यैकदा रामं वव्रे शूर्पणखाऽभिका ।**
**तन्निरस्ता लक्ष्मणं च वव्रे सोऽपि निराकरोत् ॥७॥**

**पदविभाग:**

तत्र अभ्येत्य एकदा रामं वव्रे शूर्पणखा अभिका । तन्निरस्ता लक्ष्मणं च वव्रे सः अपि निराकरोत् ॥७॥

**अन्वय:**

तत्र एकदा रामं अभ्येत्य शूर्पणखा अभिका वव्रे । तन्निरस्ता लक्ष्मणं च वव्रे । सः अपि निराकरोत् ।

**तात्पर्यम्**

वने एकदा रामं अभ्येत्य शूर्पणखा अभिका वव्रे । परन्तु रामः निराकरोत् । अतः सा लक्ष्मणं च वव्रे । सः अपि निराकरोत् ।

**व्याकरणम्**

♦ सन्धि:

तत्र + अभ्येत्य - सवर्णदीर्घसन्धि:

अभ्येत्य + एकदा - वृद्धिसन्धि:

सः + अपि - विसर्गउकार:

♦ समास:

शूर्पा: इव नखा: यस्या: सा - शूर्पणखा - समानाधिकरणबहु व्रीहिसमासः

♦ कृदन्ता:

अभ्येत्य - अभि + इण् + ल्यप् प्रत्यय:

अभिका - कामी

**मूल श्लोक:**

**राममेव ततो वव्रे कामार्ता कामसन्निभम् ।**
**पुनश्च धिक्कृता तेन सीतामभ्यद्रवद्रुषा ॥८॥**

**पदविभाग:**

रामम् एव ततः वव्रे कामार्ता कामसन्निभम् । पुनः च धिक्कृता तेन सीताम् अभ्यद्रवद् रुषा ॥

**अन्वय:**

ततः कामार्ता कामसन्निभं रामम् एव वव्रे । पुनः च धिक्कृता तेन रुषा सीताम् अभ्यद्रवत् ।

**तात्पर्यम्**

ततः कामार्ता शूर्पणका कामसन्निभं रामम् एव वव्रे । पुनः च धिक्कृता तेन रुषा शूर्पणका सीताम् अभ्यद्रवत् ।

**व्याकरणम्**

♦ सन्धि:
तत: + वव्रे - विसर्गउकार:
पुन: + च - विसरंगसकार:
♦ समास:
कामम् आर्ता - कामार्ता - द्वितीयातत्पुरुष:

*अभ्यद्रवत् - अभि + अद्रवत्*
*अद्रवत् - द्रु धातु: लङ्लकार: प्रथमपुरुष: अद्रवत् अद्रवताम् अद्रवन्*

**मूल श्लोकः**

**लक्ष्मणेन तदा रोषात्कृत्तश्रवणनासिका ।**
**सा तु गत्वा जनस्थानं खरायैतन्न्यवेदयत् ॥९॥**

**पदविभागः**

लक्ष्मणेन तदा रोषात् कृत्तश्रवणनासिका । सा तु गत्वा जनस्थानं खराय एतत् न्यवेदयत् ।

**अन्वयः**

तदा रोषात् लक्ष्मणेन कृत्तश्रवणनासिका सा तु जनस्थानं गत्वा खराय एतत् न्यवेदयत् ।

**तात्पर्यम्**

तदा रोषात् लक्ष्मणः तस्याः श्रवणनासिकां छिन्नवान् । पश्चात् सा तु जनस्थानं गत्वा तस्याः सहोदराय खराय एतत् न्यवेदयत् ।

**व्याकरणम्**

♦ सन्धिः

खराय + एतत् - वृद्धिसन्धिः

एतत् + न्यवेदयत् - अनुनासिकासन्धिः

♦ समासः

श्रवणे च नासिका च एतेषां समाहारः -श्रवणनासिकम् समाहाद्वन्द्वसमासः

कृत्तं श्रवणनासिकं यस्याः सा - कृत्तश्रवणनासिका - समानाधिकरणबहु व्रीहिसमासः

♦ कृदन्ताः

गत्वा - गम् + क्त प्रत्ययः

*जनस्थानम् - राक्षसानां वासभूतः*

**मूल श्लोक:**

**तदाकर्ण्य खरः क्रुद्धो राघवं हन्तुमाययौ ।**
**दूषणत्रिशिरोमुख्यैर्यातुधानैः समन्वितः ॥१०॥**

**पदविभाग:**

तत् आकर्ण्य खरः क्रुद्धः राघवं हन्तुम् आययौ दूषणत्रिशिरोमुख्यैः यातुधानैः समन्वितः

**अन्वय:**

तत् आकर्ण्य क्रुद्धः खरः दूषण त्रिशिरो मुख्यैः यातुधानैः समन्वितः राघवं हन्तुम् आययौ ।

**तात्पर्यम्**

पश्चात् तत् आकर्ण्य खर: क्रुद्धः अभवत् । अत: स: दूषणत्रिशिरोमुख्यैः यातुधानैः समन्वितः राघवं हन्तुम् आययौ ।

**व्याकरणम्**

♦ सन्धि:

तत् + आकर्ण्य - जश्त्वसन्धि:
क्रुद्धः + राघवं - विसर्गउकार:

♦ कृदन्ता:

आकर्ण्य - आ+ कर्ण् + ल्यप् प्रत्यय:
हन्तुम् - हन् + तुमुन्प्रत्यय:

*आययौ - आ + ययौ     ययौ - या धातु: लिट्लकार: प्रथमपुरुष: ययौ ययतु: ययु:*

*दूषण: - खरस्य सहोदर: सेनापति: च    त्रिशिरा: - खरस्य मन्त्री*
*यातुधान: - राक्षस:*

**मूल श्लोक:**

**तत्क्षणं लक्ष्मणे सीतां निधाय रघुनन्दनः ।**
**खरं सहानुगं सङ्ख्ये जघान लघुविक्रमः ॥११॥**

**पदविभाग:**

तत्क्षणं लक्ष्मणे सीतां निधाय रघुनन्दनः खरं सहानुगं सङ्ख्ये जघान लघुविक्रमः

**अन्वय:**

लघुविक्रमः रघुनन्दनः तत्क्षणं लक्ष्मणे सीतां निधाय खरं सहानुगं सङ्ख्ये जघान ।

**तात्पर्यम्**

पश्चात् लघुविक्रमः रघुनन्दनः श्रीराम: तत्क्षणं लक्ष्मणे सीतां निधाय दूषणं त्रिशिरां खरं च सङ्ख्ये जघान ।

**व्याकरणम्**

♦ समास:
अनुगच्छन्ति इति अनुगा:
अनुगै: सह वर्तते इति सहानुग: सहपूर्वपदकर्मधारयसमास: तम्
लघु: विक्रम: यस्य स: लघुविक्रम: - समानाधिकरणबहुव्रीहि: समास:
♦ कृदन्ता:
निधाय - नि+धा + ल्यप् प्रत्यय:

*जघान हन् धातु: लिट् लकार: प्रथमपुरुष: जघाम जघ्नतु: जघ्नु:*

**मूल श्लोक:**

**ततः शूर्पणखा गत्वा लङ्कां शोकसमन्विता ।**
**न्यवेदयद्रावणाय वृत्तान्तं सर्वमादितः ॥१२॥**

**पदविभाग:**

ततः शूर्पणखा गत्वा लङ्कां शोकसमन्विता न्यवेदयत् रावणाय वृत्तान्तं सर्वम् आदितः

**अन्वय:**

ततः शोकसमन्विता शूर्पणखा लङ्कां गत्वा वृत्तान्तं सर्वम् आदितः रावणाय न्यवेदयत् ।

**तात्पर्यम्**

राम: खरं दूषणं च हतवान् । ततः शोकसमन्विता शूर्पणखा लङ्कां गतवती । तत्र रावणाय वृत्तान्तं सर्वम् आदितः न्यवेदयत् ।

**व्याकरणम्**

♦ सन्धि:

न्यवेदयत् + रावणाय - जश्त्वसन्धि:

♦ समास:

शोकेन समन्विता - शोकसमन्विता - तृतीयातत्पुरुष:

♦ कृदन्ता:

गत्वा - गम् धातु: + क्त्वा प्रत्यय:

**मूल श्लोक:**

**तच्छ्रुत्वा रावणः सीतां हर्तुं कृतमतिस्तदा ।**
**मारीचस्याश्रमं प्राप्य साहाय्ये तमचोदयत् ॥१३॥**

**पदविभाग:**

तत् श्रुत्वा रावणः सीतां हर्तुं कृतमतिः तदा मारीचस्य आश्रमं प्राप्य साहाय्ये तम् अचोदयत्

**अन्वय:**

तत् श्रुत्वा तदा रावणः सीतां हर्तुं कृतमतिः मारीचस्य आश्रमं प्राप्य साहाय्ये तम् अचोदयत् ।

**तात्पर्यम्**

तत् श्रुत्वा तदा रावणः सीतां हर्तुं चिन्तितवान् । अत: स: मारीचस्य आश्रमं प्राप्य साहाय्ये तम् अचोदयत् ।

**व्याकरणम्**

♦ सन्धि:

तत् + श्रुत्वा - श्चुत्वसन्धि: छत्वसन्धि:

कृतमतिः +तदा - विसर्गसकार:

मारीचस्य + आश्रमम् - सवर्णदीर्घसन्धि:

♦ समास:

कृता मति: येन स: - कृतमति: - समानाधिकरणबहुव्रीहिसमास:

♦ कृदन्ता:

श्रुत्वा - श्रु + क्त्वा प्रत्यय:

हर्तुम् - हृ + तुमुन् प्रत्यय:

प्राप्य - प्रा + आप् + ल्यप् प्रत्यय:

## मूल श्लोक:

**सोऽपि स्वर्णमृगो भूत्वा सीतायाः प्रमुखेऽचरत् ।**
**सा तु तं मृगमाहर्तुं भर्तारं समयाचत ॥१४॥**

## पदविभाग:

सः अपि स्वर्णमृगः भूत्वा सीतायाः प्रमुखे अचरत् सा तु तं मृगम् आहर्तुं भर्तारं समयाचत

## अन्वय:

सः अपि स्वर्णमृगः भूत्वा सीतायाः प्रमुखे अचरत् । सा तु तं मृगम् आहर्तुं भर्तारं समयाचत ।

## तात्पर्यम्

सीतां हर्तुं रावणः मारीचस्य सहाय्यम् अचोदयत् । पश्चात् मारीचः अपि स्वर्णमृगः भूत्वा सीतायाः प्रमुखे अचरत् । सीता तं मृगम् आहर्तुं भर्तारं श्रीरामं समयाचत ।

## व्याकरणम्

♦ सन्धिः

सः + अपि - विसर्गउकारः पूर्वरूपसन्धिः

स्वर्णमृगः + भूत्वा -विसर्गउकारः

प्रमुखे + अचरत् -पूर्वरूपसन्धिः

♦ कृदन्ताः

भूत्वा - भू + क्त्वा प्रत्ययः

आहर्तुम् - आ + हृ +तुमुन्प्रत्ययः

**मूल श्लोकः**

**नियुज्य लक्ष्मणं सीतां रक्षितुं रघुनन्दनः ।**
**अन्वगच्छन्मृगं तूर्णं द्रवन्तं काननान्तरे ॥१५॥**

**पदविभागः**

नियुज्य लक्ष्मणं सीतां रक्षितुं रघुनन्दनः अन्वगच्छत् मृगं तूर्णं द्रवन्तं काननान्तरे

**अन्वयः**
रघुनन्दनः लक्ष्मणं सीतां रक्षितुं नियुज्य, तूर्णं द्रवन्तं मृगं काननान्तरे अन्वगच्छत् ।

**तात्पर्यम्**

पश्चात् रामः लक्ष्मणं सीतां रक्षितुं नियुज्य, तूर्णं धावन्तम् मृगं वनान्तरे अन्वगच्छत् ।

**व्याकरणम्**
♦ समासः
काननस्य अन्तरम् - काननान्तरम् - षष्ठीतत्पुरुषः तस्मिन्

♦ कृदन्ताः
नियुज्य - नि + युज् + ल्यप् प्रत्ययः
रक्षितुम् - रक्ष् + तुमुन् प्रत्ययः
अन्वगच्छत् - अनु + अगच्छत्

*द्रवन्तं - द्रु धातोः शत्रन्तद्वितीया एकवचनम्*
*तूर्णं - शीघ्रम्*

**मूल श्लोकः**

**विव्याध च मृगं रामः स निजं रूपमास्थितः ।**
**हा सीते लक्ष्मणेत्येवं रुदन्प्राणान्समत्यजत् ॥१६॥**

**पदविभागः**

विव्याध च मृगं रामः सः निजं रूपम् आस्थितः हा सीते लक्ष्मण इति एवं रुदन् प्राणान् समत्यजत्

**अन्वयः**

रामः च मृगं विव्याध । सः निजं रूपम् आस्थितः । हा सीते लक्ष्मण इति एवं रुदन् प्राणान् समत्यजत् ।

**तात्पर्यम्**

रामः च मृगं विव्याध । सः (मारीचः) निजं रूपम् आस्थितः । "हा सीते लक्ष्मण" इति एवं उच्चैः रुदन् मारीचः प्राणान् समत्यजत् ।

**व्याकरणम्**
♦ सन्धिः
लक्ष्मण + इति - गुणसन्धि
इति + एवं - यण्सन्धिः

*विव्याध - व्यध् धातोः लिट लकारः प्रथमपुरुषः विव्याध विव्यधतुः विव्यधुः*
*समत्यजत् - सम् + अत्यजत्*
*अत्यजत् - त्यज् धातोः लङ्लकारः प्रथमपुरुषः अत्यजत् अत्यजताम् अत्यजन्*

**मूल श्लोक:**

**एतदाकर्ण्य वैदेह्या लक्ष्मणश्चोदितो भृशम् ।**
**तद्रक्षां देवताः प्रार्थ्य प्रययौ राघवान्तिकम् ॥१७॥**

**पदविभाग:**

एतत् आकर्ण्य वैदेह्या: लक्ष्मणः चोदितः भृशम् तद् रक्षां देवताः प्रार्थ्य प्रययौ राघवान्तिकम्

**अन्वय:**

एतत् आकर्ण्य भृशं चोदितः लक्ष्मणः देवताः वैदेह्या: तद्रक्षां प्रार्थ्य राघवान्तिकं प्रययौ ।

**तात्पर्यम्**

मारीचस्य वचनम् श्रुत्वा भृशं चोदितः लक्ष्मणः देवता: वैदेह्या: तद्रक्षां प्रार्थ्य श्रीरामस्य समीपे प्रययौ ।

**व्याकरणम्**

♦ सन्धि:

एतत् + आकर्ण्य - जश्त्वसन्धि:

वैदेह्या: + भृशम् - विसर्गलोप:

लक्ष्मण: + चोदित: - विसर्गसकार:

चोदित: + भृशम् - विसर्गउकार:

♦समास:

राघवस्य अन्तिकं - राघवान्तिकम् - षष्ठीतत्पुरुष:

तस्या: रक्षाम् - तद्रक्षाम् - षष्ठीतत्पुरुष:

♦कृदन्ता:

आकर्ण्य - आ + कर्ण् + ल्यप् प्रत्यय:

प्राथ्र्य - प्रा + अर्थ् + ल्यप् प्रत्यय:

*प्रययौ - प्र + या धातु: लिट् लकार: प्रथमपुरुष: ययौ ययतु: ययु:*

*अन्तिकम् - समीपे*

**मूल श्लोक:**

**तदन्तरं समासाद्य रावणो यतिरूपधृत् ।**
**सीतां गृहीत्वा प्रययौ गगनेन मुदाऽन्वितः ॥१८॥**

**पदविभाग:**

तदन्तरं समासाद्य रावणः यतिरूपधृत् सीतां गृहीत्वा प्रययौ गगनेन मुदान्वितः

अन्वय:

तदन्तरं रावणः यतिरूपधृत् समासाद्य, मुदान्वितः सीतां गृहीत्वा गगनेन प्रययौ ।

**तात्पर्यम्**

लक्ष्मण: रामस्य समीपे गतवान् । तदन्तरं रावणः यतिरूपं धृत्वा समासाद्य, मुदान्वितः सीतां गृहीत्वा गगनेन प्रययौ ।

**व्याकरणम्**

रावणः + यतिरूपधृत् - विसर्ग उकार:

♦ कृदन्ता:

गृहीत्वा - ग्रह् + क्त्वा प्रत्यय:
समासाद्य - सम् + आ + सद् + ल्यप् प्रत्यय:

गगनम् - आकाशम्

**मूल श्लोक:**

**ततो जटायुरालोक्य नीयमानां तु जानकीम् ।**
**प्राहरद्रावणं प्राप्य तुण्डपक्षनखैर्भृशम् ॥१९॥**

**पदविभाग:**

ततः जटायुः आलोक्य नीयमानां तु जानकीम् प्राहरद् रावणं प्राप्य तुण्डपक्षनखैः भृशम्

**अन्वय:**

ततः जटायुः जानकीं नीयमानां तु आलोक्य, रावणं प्राप्य, तुण्डपक्षनखैः भृशं प्राहरत् ।

**तात्पर्यम्**

रावण: सीतां गृहीत्वा गतवान् । ततः जटायुः जानकीं नीयमानां तु आलोक्य रावणस्य समीपे गतवान् । तुण्डपक्षनखैः भृशं प्राहरत् ।

**व्याकरणम्**

♦ सन्धि:

ततः +जटायुः - विसर्गउकार:
जटायुः + आलोक्य - विसर्गरेफ:
प्राहरत् + रावणम् - जश्त्वसन्धि:
तुण्डपक्षनखैः + भृशम् - विसर्गरेफ:

♦ कृदन्ता:

आलोक्य - आ + लोक् + ल्यप् प्रत्यय:
प्राप्य - प्रा + आप् + ल्यप् प्रत्यय:

♦तद्धितान्ता:

जनकस्य अपत्यं स्त्री जानकी

*प्राहरत् - प्र + अहरत्*

*अहरत् - हृ धातु: लङ् लकार: प्रथमपुरुष: अहरत् अहरताम् अहरन्*

**मूल श्लोक:**

**छित्त्वैनं चन्द्रहासेन पातयित्वा च भूतले ।**
**गृहीत्वा रावणः सीतां प्राविशन्निजमन्दिरम् ॥२०॥**

**पदविभाग:**

छित्त्वा एनं चन्द्रहासेन पातयित्वा च भूतले गृहीत्वा रावणः सीतां प्राविशत् निजमन्दिरम्

**अन्वय:**

एनं चन्द्रहासेन छित्त्वा, भूतले च पातयित्वा, रावणः सीतां गृहीत्वा, निजमन्दिरं प्राविशत् ।

**तात्पर्यम्**

एनं तस्य खड्गेन (चन्द्रहासेन) जटायुं छित्त्वा, भूतले च पातयित्वा, रावणः सीतां गृहीत्वा, स्वगृहं प्राविशत् ।

**व्याकरणम्**

♦ सन्धि:

छित्त्वा + एनं - वृद्धिसन्धि:

प्राविशत् + निजमन्दिरम् - अनुनासिकासन्धि:

♦ कृदन्ता:

छित्त्वा - छिद् + क्त्वा प्रत्यय:

पातयित्वा - पत् + णिच् + क्त्वा प्रत्यय:

गृहीत्वा - ग्रह् + क्त्वा प्रत्यय:

*चन्द्रहास - रावणस्य खड्ग:*

**मूल श्लोक:**

**अशोकवनिकामध्ये संस्थाप्य जनकात्मजाम् ।**
**रावणो रक्षितुं चैनां नियुयोज निशाचरीः ॥२१॥**

**पदविभाग:**
अशोकवनिका मध्ये संस्थाप्य जनकात्मजाम् रावणः रक्षितुं च एनां नियुयोज निशाचरीः

**अन्वय**:

रावणः जनकात्मजाम् अशोकवनिकामध्ये संस्थाप्य एनां रक्षितुं च निशाचरीः नियुयोज ।

**तात्पर्यम्**

रावणः सीताम् अशोकवनिकामध्ये संस्थाप्य एनां रक्षितुं च निशाचरीः नियुयोज ।

**व्याकरणम्**
♦ सन्धि:
रावण: + रक्षितुं - विसर्गउकार:
च + एनां - वृद्धिसन्धि:
♦ कृदन्ता:
संस्थाप्य - सम् + स्था + ल्यप् प्रत्यय:
रक्षितुम् - रक्ष् + तुमुन्प्रत्यय:

*नियुयोज - नि + युज् + लिट् लकार: प्रपु एक*

**मूल श्लोक:**

**हत्वा रामस्तु मारीचमागच्छन्ननुजेरिताम् ।**
**वार्तामाकर्ण्य दुःखार्तः पर्णशालामुपागमत् ॥२२॥**

**पदविभाग:**

हत्वा रामः तु मारीचम् आगच्छन् अनुजेरिताम् वार्ताम् आकर्ण्य दुःखार्तः पर्णशालाम् उपागमत्

**अन्वय:**

रामः तु मारीचं हत्वा आगच्छन् अनुजेरितां वार्ताम् आकर्ण्य, दुःखार्तः पर्णशालाम् उपागमत् ।

**तात्पर्यम्**

रावण: सीतां अपहृत्य लङ्गां गतवान् । रामः तु मारीचं हत्वा आगच्छन् अनुजेरितां वार्ताम् आकर्ण्य दुःखार्त: पर्णशालाम् उपागमत् ।

**व्याकरणम्**

♦ सन्धि:

रामः + तु - विसर्गसकार:

आगच्छन् + अनुजेरिताम् - ङमुडागमसन्धि:

♦ समास:

अनुजेन ईरिता - अनुजेरिता ताम् - तृतीयातत्पुरुष:

♦ कृदन्ता:

हत्वा - हन्+ क्त्वा प्रत्यय:

उपागमत् - उप + आ + अगमत्

ईरिता - ईर् + क्त प्रत्यय: (स्त्री)

**मूल श्लोक:**

**अदृष्ट्वा तत्र वैदेहीं विचिन्वानो वनान्तरे ।**
**सहानुजो गृध्रराजं छिन्नपक्षं ददर्श सः ॥२३॥**

**पदविभाग:**

अदृष्ट्वा तत्र वैदेहीं विचिन्वानः वनान्तरे सहानुजः गृध्रराजं छिन्नपक्षं ददर्श सः

**अन्वय:**

तत्र वैदेहीं अदृष्ट्वा वनान्तरे सहानुजः विचिन्वानः सः छिन्नपक्षं गृध्रराजं ददर्श ।

**तात्पर्यम्**

पश्चात् तत्र वैदेहीं अदृष्ट्वा वनान्तरे लक्ष्मणेन सह राम: विचिन्वानः छिन्नपक्षं गृध्रराजं ददर्श ।

**व्याकरणम्**

♦ सन्धि:

विचिन्वानः + वनान्तरे - विसर्गउकार:

सहानुजः + गृध्रराजं - विसर्गउकार:

♦ समास:

गृध्राणां राजा - गृध्रराज: - षष्ठीतत्पुरुष: - तम्

अनुजेन सह वर्तते इति सहानुज: - सहपूर्वपदकर्मधारयसमास:

छिन्नौ पक्षौ यस्य स: - छिन्नपक्ष: समानाधिकरणबहुव्रीहिसमास: - तम्

♦कृदन्ता:

अदृष्ट्वा - अ + दृश् + क्त्वा प्रत्यय:

*ददर्श - दृश् धातो: लिट् लकार: प्रथमपुरुष: ददर्श ददृशतु: ददृशु:*

**मूल श्लोक:**

**तेनोक्तां जानकीवार्तां श्रुत्वा पश्चान्मृतं च तम् ।**
**दग्ध्वा सहानुजो रामश्चक्रे तस्योदकक्रियाम् ॥२४॥**

**पदविभाग:**

तेन उक्तां जानकीवार्तां श्रुत्वा पश्चात् मृतं च तम् दग्ध्वा सहानुजः रामः चक्रे तस्य उदकक्रियाम्

**अन्वय:**

तेन उक्तां जानकी वार्तां श्रुत्वा, पश्चात् तं मृतं च दग्ध्वा, सहानुजः रामः तस्य उदकक्रियां चक्रे ।

**तात्पर्यम्**

छिन्नपक्षेन उक्तां जानकी वार्तां आकर्ण्य पश्चात् तं मृतं च दग्ध्वा, सहानुजः रामः तस्य उदकक्रियां चक्रे ।

**व्याकरणम्**

♦ सन्धि:

तेन + उक्तां - गुणसन्धि: पश्चात् + मृतं - अनुनासिकासन्धि:
सहानुजः + रामः – विसर्गउकार तस्य + उदकक्रियाम् - गुणसन्धि:

♦समास:

अनुजेन सह वर्तते इति सहानुज: - सहपूर्वपदकर्मधारयसमास:

♦ कृदन्ता:

श्रुत्वा - श्रु + क्त्वा प्रत्यय:
दग्ध्वा - दह् + क्त्वा प्रत्यय:

*चक्रे - कृ अत्मनेपदि लिट् लकार: प्रथमपुरुष: चक्रे चक्राते चक्रिरे*

**मूल श्लोकः**

**आत्मनोऽभिभवं पश्चात्कुर्वतीं पथि लक्ष्मणः ।**
**अयोमुखीं चकाराशु कृत्तश्रवणनासिकाम् ॥२५॥**

**पदविभागः**

अभिभवं पश्चात् कुर्वतीं पथि लक्ष्मणः अयोमुखीं चकार आशु कृत्तश्रवणनासिकाम्

**अन्वयः**

पश्चात् पथि लक्ष्मणः आत्मनः अभिभवं कुर्वतीं अयोमुखीं आशु कृत्तश्रवणनासिकां चकार ।

**तात्पर्यम्**

पश्चात् पथि लक्ष्मणः आत्मनः अभिभवं कुर्वतीं अयोमुखी नाम राक्षसीं आशु कृत्तश्रवणनासिकां चकार ।

**व्याकरणम्**

♦ सन्धिः

आत्मनः + अभिभवम् - विसर्गउकारः पूर्वरूपसन्धिः च

चकार + आशु - सवर्णदीर्घसन्धिः

♦ समासः

अयः इव मुखम् यस्याः सा अयोमुखी - समानाधिकरणबहुव्रीहिसमासः

**मूल श्लोकः**

**गृहीतौ तौ कबन्धेन भुजौ तस्य न्यकृन्तताम् ।**
**ततस्तु याचितौ तेन तद्देहं देहतुश्च तौ ॥२६॥**

**पदविभागः**

गृहीतौ तौ कबन्धेन भुजौ तस्य न्यकृन्तताम् ततः तु याचितौ तेन तत् देहं देहतुः च तौ

**अन्वयः**

तौ कबन्धेन गृहीतौ, तस्य भुजौ न्यकृन्तताम् । ततः तु तेन याचितौ तौ तत् देहं च देहतुः ।

**तात्पर्यम्**

कबन्धः रामलक्ष्मणौ गृहीतवान् । तौ तस्य भुजौ न्यकृन्तताम् । ततः तु कबन्धेन याचितौ तौ तत् देहं च देहतुः ।

**व्याकरणम्**

♦ सन्धिः

ततः + तु - विसर्गसकारः

तत् + देहम् - जश्त्वसन्धिः

*न्यकृन्तताम् - नि + अकृन्तताम्*

*अकृन्तताम् - कृत् धातोः लङ् लकारः प्रथमपुरुषः द्विवचनम्*

*देहतुः - दह् धातोः लिट् लकारः प्रथमपुरुषः ददाह देहतुः देहुः*

**मूल श्लोक:**

**स तु दिव्याकृतिर्भूत्वा रामं सीतोपलब्धये ।**
**सुग्रीवमृष्यमूकस्थं याहीत्युक्त्वा दिवं ययौ ॥२७॥**

**पदविभाग:**

सः तु दिव्याकृतिः भूत्वा रामं सीता उपलब्धये सुग्रीवम् ऋष्यमूकस्थं याहि इति उक्त्वा दिवं ययौ

**अन्वय:**

स: तु दिव्याकृतिः भूत्वा रामं "सीता-उपलब्धये ऋष्यमूकस्थं सुग्रीवं याहि" इति उक्त्वा दिवं ययौ ।

**तात्पर्यम्**

पश्चात् स: तु दिव्याकृतिः भूत्वा रामं "सीता उपलब्धये ऋष्यमूकस्थं सुग्रीवं याहि" इति उक्त्वा दिवं ययौ ।

**व्याकरणम्**

♦ सन्धि:

स: + तु - विसर्गलोप:

दिव्याकृतिः + भूत्वा - विसर्गरेफ:

सीता + उपलब्धये - गुणसन्धि:

याहि + इति - सवर्णदीर्घसन्धि:

इति + उक्त्वा - यण्सन्धि:

♦ समास:

सीताया: उपलब्धि: - षष्ठीतत्पुरुष: तस्यै

♦ कृदन्ता:

भूत्वा - भू + क्त्वा प्रत्यय:

उक्त्वा - वच् + क्त्वा प्रत्यय:

*याहि - या धातो: लोट् मध्यमपुरुष: यातात्/याहि यातम् यात*

*ययौ - या धातु: लिट् लकार: प्रथमपुरुष: ययौ ययतु: ययु:*

**मूल श्लोक:**

**ततः प्रीतो रघुश्रेष्ठः शबर्याश्रममभ्ययात् ।**
**तयाऽभिपूजितः पश्चात्पम्पां प्राप सलक्ष्मणः ॥२८॥**

**पदविभाग:**

ततः प्रीतः रघुश्रेष्ठः शबरी-आश्रमम् अभ्ययात् । तया अभिपूजितः पश्चात् पम्पां प्राप सलक्ष्मणः

**अन्वय:**

ततः रघुश्रेष्ठः प्रीतः शबरी-आश्रमम् अभ्ययात् । तया सलक्ष्मणः अभिपूजितः पश्चात् पम्पां प्राप ।

**तात्पर्यम्**

पश्चात् राम: प्रीतः शबरी आश्रमम् अभ्ययात् । तया सलक्ष्मणः अभिपूजितः पश्चात् पम्पां प्राप ।

**व्याकरणम्**

♦ सन्धि:

प्रीतः + रघुश्रेष्ठः - विसर्गउकार:

♦ समास:

लक्ष्मणेन सह वर्तते इति सलक्ष्मण: - सहपूर्वपदकर्मधारयसमास:
शबर्या: आश्रमम् - शबर्याश्रमम् - षष्ठीतत्पुरुष:

अभ्ययात् - अभि + अयात्
अयात् - या धातो: लङ्लकार: प्रथमपुरुष: अयात् अयाताम् अयान् /अयु:
प्राप - प्र + आप् धातो: लिट् लकार: प्रथमपुरुष: आप आपतु आपु:

***॥ इति श्रीरामोदन्ते आरण्यकाण्डः समाप्तः ॥***

# ॥ आरण्यकाण्डः संक्षेपः ॥

विराधः नाम राक्षसः वने व्रजतः रामलक्ष्मणौ च सीता च हतवान् । तदा रामः विराधम् अवधीत् । पश्चात् रामः शरभङ्गाश्रमं गतवान् । तत्र सः मुनिं नमस्कृतवान् । सः "राम! भवतः दर्शनेन अहं भाग्यं प्राप्तवान् । भवान् अत्रतः सुतीक्ष्णमुनेः आश्रमं गच्छ! सः मुनिः तुभ्यं मार्गं दर्शयति" इत्युक्त्वा होमाग्नौ स्वस्य शरीरं त्यक्तवान् । अतः अनेक ऋषयः आगत्य राक्षसाणां पीडनम् अवदन् । अतः रामः "राक्षसान् वधं करिष्यामि" इति प्रतिज्ञां दत्तवान् । तस्मात् रामः सुतीक्ष्णस्य आश्रमं गत्वा तं नमस्कृतवान् । एवम् अनेक मुनीन् नमस्कृत्य रघूत्तमः अगस्त्यस्य आश्रमं प्राप्य तं ननाम ।

अतः कुम्भसम्भवः (अगस्त्यः) रामाय वैष्णवं चापम् ऐन्द्रं तूणीयुगं तथा ब्राह्मं अस्त्रं च खड्गं च प्रददौ । पश्चात् काकुत्स्थः रामः गच्छन् जटायुषम् समागम्य वैदेहयाः पालनाय एनं पितृवल्लभं श्रद्धधे । ततः रामः पञ्चवटीं प्राप्तवान् । तत्र लक्ष्मणः पर्णशालाम् निर्माणं कृतवान् । तत्र रामः सीतया सहितः सुखम् अध्युवास । वने एकदा रामं अभ्येत्य शूर्पणखा अभिका वव्रे । परन्तु रामः निराकरोत् । अतः सा लक्ष्मणं च वव्रे । सः अपि निराकरोत् । ततः कामार्ता शूर्पणका कामसन्निभं रामम् एव वव्रे । पुनः च धिक्कृता तेन रुषा शूर्पणका सीताम् अभ्यद्रवत् । तदा रोषात् लक्ष्मणः तस्याः श्रवणनासिकां छिन्नवान् । पश्चात् सा तु जनस्थानं गत्वा तस्याः सहोदराय खराय एतत् न्यवेदयत् ।

पश्चात् तत् आकर्ण्य खरः क्रुद्धः अभवत् । अतः सः दूषणत्रिशिरोमुख्यैः यातुधानैः समन्वितः राघवं हन्तुम् आययौ । अतः लघुविक्रमः रघुनन्दनः श्रीरामः तत्क्षणं लक्ष्मणे सीतां निधाय दूषणं त्रिशिरं खरं च सङ्ख्ये जघान । रामः खरं दूषणं च हतवान् । ततः शोकसमन्विता शूर्पणखा लङ्कां गतवती । तत्र रावणाय वृत्तान्तं सर्वम् आदितः न्यवेदयत् । तत् श्रुत्वा तदा रावणः सीतां हर्तुं चिन्तितवान् । अतः सः मारीचस्य आश्रमं प्राप्य साहाय्ये तम् अचोदयत् ।

सीतां हर्तुं रावण: मारीचस्य सहाय्यम् अचोदयत् । पश्चात् मारीच: अपि स्वर्णमृगः भूत्वा सीतायाः प्रमुखे अचरत् । सीता तं मृगम् आहर्तुं भर्तारं श्रीरामं समयाचत । अत: राम: लक्ष्मणं सीतां रक्षितुं नियुज्य, तूर्णं धावन्तम् मृगं वनान्तरे अन्वगच्छत् । रामः च मृगं विव्याध । सः (मारीच:) निजं रूपम् आस्थितः । "हा सीते लक्ष्मण" इति एवं उच्चै: रुदन् मारीच: प्राणान् समत्यजत् ।

मारीचस्य वचनम् श्रुत्वा भृशं चोदितः लक्ष्मणः देवता: वैदेहया: तद्रक्षां प्रार्थ्य श्रीरामस्य समीपे प्रययौ । लक्ष्मण: रामस्य समीपे गतवान् । तदन्तरं रावणः यतिरूपं धृत्वा समासाद्य, मुदान्वितः सीतां गृहीत्वा गगनेन प्रययौ । रावण: सीतां गृहीत्वा गतवान् । ततः जटायुः जानकीं नीयमानां तु आलोक्य रावणस्य समीपे गतवान् । तुण्डपक्षनखैः भृशं प्राहरत् । एनं तस्य खड्गेन (चन्द्रहासेन) जटायुं छित्त्वा, भूतले च पातयित्वा, रावणः सीतां गृहीत्वा, स्वगृहं प्राविशत् । रावणः सीताम् अशोकवनिकामध्ये संस्थाप्य एनां रक्षितुं च निशाचरीः नियुयोज ।

रामः तु मारीचं हत्वा आगच्छन् अनुजेरितां वार्ताम् आकर्ण्य दुःखार्त: पर्णशालाम् उपागमत् । पश्चात् तत्र वैदेहीं अदृष्ट्वा वनान्तरे लक्ष्मणेन सह राम: विचिन्वानः छिन्नपक्षं गृध्रराजं ददर्श । छिन्नपक्षेन उक्तां जानकी वार्तां आकर्ण्य पश्चात् तं मृतं च दग्ध्वा, सहानुजः रामः तस्य उदकक्रियां चक्रे । पश्चात् पथि लक्ष्मणः आत्मनः अभिभवं कुर्वतीं अयोमुखी नाम राक्षसीं आशु कृत्तश्रवणनासिकां चकार । कबन्ध: रामलक्ष्मणौ गृहीतवान् । तौ तस्य भुजौ न्यकृन्तताम् । ततः तु कबन्धेन याचितौ तौ तत् देहं च देहतुः । पश्चात् स: तु दिव्याकृतिः भूत्वा रामं “सीता उपलब्धये ऋष्यमूकस्थं सुग्रीवं याहि” इति उक्त्वा दिवं ययौ । अत: राम: प्रीतः शबरी आश्रमम् अभ्ययात् । तया सलक्ष्मणः अभिपूजितः पश्चात् पम्पां प्राप ।

***॥ इति श्रीरामोदन्ते आरण्यकाण्डः संक्षेप: समाप्तः ॥***



# ॥ श्रीरामोदन्तः ॥

# अथ किष्किन्धाकाण्डः

मूल श्लोक:

हनूमानथ सुग्रीवनिर्दिष्टो रामलक्ष्मणौ ।
प्राप्य श्रुत्वा तु वृत्तान्तं तेन तौ समयोजयत् ॥१॥

**पदविभाग**:
हनूमान् अथ सुग्रीवनिर्दिष्ट: रामलक्ष्मणौ प्राप्य श्रुत्वा तु वृत्तान्तं तेन तौ समयोजयत्

अन्वय:

अथ सुग्रीवनिर्दिष्टः हनूमान् रामलक्ष्मणौ प्राप्य तु वृत्तान्तं श्रुत्वा तेन तौ समयोजयत्
।

तात्पर्यम्

अथ सुग्रीवनिर्दिष्टः हनूमान् रामलक्ष्मणौ प्राप्तवान् । स: तु वृत्तान्तं श्रुत्वा तेन तौ समयोजयत् ।

व्याकरणम्
♦ सन्धि:
 सुग्रीवनिर्दिष्ट: + रामलक्ष्मणौ - विसर्गउकार:
♦ समास:
राम: च लक्ष्मण: च -रामलक्ष्मणौ इतरेतरद्वन्द्वसमास:
सुग्रिवेन निर्दिष्ट: सुग्रिवनिर्दिष्ट: - तृतीयातत्पुरुष:

प्राप्य - प्र + आप् + ल्यप् प्रत्यय:
श्रुत्वा - श्रु+ क्त्वा प्रत्यय:
समयोजयत् - सम् + अयोजयत्
अयोजयत् - युज् धातु लङ्लकार: प्रथमपुरुष: एकवचनम्
अयोजयत्/अयोजयत अयोजयताम् /अयोजयेताम् अयोजयन्/अयोजयन्त

मूल श्लोक:

ततो रामस्य वृत्तान्तं सुग्रीवाय निवेद्य सः ।
सख्यं च कारयामास तयोः पावकसन्निधौ ॥२॥

पदविभाग:

ततः रामस्य वृत्तान्तं सुग्रीवाय निवेद्य सः  सख्यं च कारयामास तयोः पावकसन्निधौ

अन्वय:

ततः सः रामस्य वृत्तान्तं सुग्रीवाय निवेद्य, तयोः पावकसन्निधौ सख्यं च कारयामास ।

तात्पर्यम्

ततः हनुमान् रामस्य वृत्तान्तं सुग्रीवाय निवेद्य, तयोः पावकसन्निधौ सख्यं च कारयामास ।

व्याकरणम्

♦ सन्धि:
ततः + रामस्य - विसर्गउकार:

♦ कृदन्त ा:
निवेद्य - नि + वेद् + ल्यप् प्रत्यय:

कारयामास - कृ धातु: + णिच् + लिट् लकार प्रपु एक

मूल श्लोक:

प्रतिजज्ञे तदा रामो हनिष्यामीति वालिनम् ।
दर्शयिष्यामि वैदेहीमित्यन्येन च संश्रुतम् ॥३॥

पदविभाग:

प्रतिजज्ञे तदा रामः हनिष्यामि इति वालिनम् दर्शयिष्यामि वैदेहीम् इति अन्येन च संश्रुतम्

अन्वय:

तदा रामः वालिनम् हनिष्यामि इति प्रतिजज्ञे । वैदेहीं दर्शयिष्यामि इति अन्येन च संश्रुतम् ।

तात्पर्यम्

तदा रामः वालिनम् हनिष्यामि इति प्रतिजज्ञे । शुग्रिव: वैदेहीं दर्शयिष्यामि इति प्रतिजज्ञे ।

व्याकरणम्

♦ सन्धि:
राम: + हनिष्यामि - विसर्गउकार:
हनिष्यामि + इति - सवर्णदीर्घसन्धि:
इति + अन्येन - यण्सन्धि:
प्रतिजज्ञे - प्रति + जज्ञे

जनँ धातु: लिट् लकार: प्रथमपुरुष: जज्ञे जज्ञाते जज्ञिरे

दर्शयिष्यामि - दृश् + णिच् + लृट् उपु एकवचनम्

मूल श्लोक:

सुग्रीवेणाथ रामाय भ्रातृवैरस्य कारणम् ।
निवेदितमशेषं च बलाधिक्यं च तस्य तत् ॥४॥

पदविभाग:

सुग्रीवेण अथ रामाय भ्रातृवैरस्य कारणम् निवेदितम् अशेषं च बलाधिक्यं च तस्य तत्

अन्वय:

अथ सुग्रीवेण रामाय भ्रातृवैरस्य कारणम्, अशेषं च तस्य तत् बलाधिक्यं च निवेदितम् ।

तात्पर्यम्

अथ सुग्रीव: रामाय स्वस्य भ्रातृवैरस्य कारणम् च तस्य तत् बलाधिक्यं च निवेदितवान् ।

व्याकरणम्

♦ सन्धि:
सुग्रीवेण+ अथ - सवर्णदीर्घसन्धि:

## मूल श्लोकः

तत्क्षणं दुन्दुभेः कायं सुग्रीवेण प्रदर्शितम् ।
सुदूरं प्रेषयामास पादाङ्गुष्ठेन राघवः ॥५॥

## पदविभागः

तत्क्षणं दुन्दुभेः कायं सुग्रीवेण प्रदर्शितम् सुदूरं प्रेषयामास पादाङ्गुष्ठेन राघवः

## अन्वयः

तत्क्षणं सुग्रीवेण दुन्दुभेः कायं प्रदर्शितम् । राघवः पादाङ्गुष्ठेन सुदूरं प्रेषयामास ।

## तात्पर्यम्

सुग्रीवः रामाय भ्रातृवैरस्य कारणम् उक्तवान् । तत्क्षणं सुग्रीवेण दुन्दुभेः कायं प्रदर्शितम् । रामः पादाङ्गुष्ठेन सुदूरं प्रेषयामास ।

## व्याकरणम्

दुन्दुभि - मन्दोदर्याः सहोदरः

मूल श्लोक:

पुनश्च दर्शितांस्तेन सालान्सप्त रघूत्तमः ।
बाणेनैकेन चिच्छेद सार्धं तस्यानुशङ्कया ॥६॥

पदविभाग:

पुनः च दर्शितान् तेन सालान् सप्त रघूत्तमः बाणेन एकेन चिच्छेद सार्धं तस्य अनुशङ्कया

अन्वय:

पुनः च रघूत्तमः तेन दर्शितान् सप्त सालान् एकेन बाणेन, सार्धं तस्य अनुशङ्कया चिच्छेद ।

तात्पर्यम्

पुनः च रघूत्तमः तेन दर्शितान् सप्त सालान् एकेन बाणेन, सार्धं तस्य अनुशङ्कया चिच्छेद ।

व्याकरणम्

♦ सन्धि:
पुनः + च - विसर्गसकार:
दर्शितान् + तेन - सत्वसन्धि:
बाणेन + एकेन - वृद्धिसन्धि:
तस्य + अनुशङ्कया - सवर्णदीर्घसन्धि:

साल: - वृक्षविशेष:

मूल श्लोकः

किष्किन्धां प्राप्य सुग्रीवस्ततो रामसमन्वितः ।
जगर्जातीव संहृष्टः कोपयन् वानराधिपम् ॥७॥

पदविभागः

किष्किन्धां प्राप्य सुग्रीवः ततः रामसमन्वितः जगर्ज अतीव संहृष्टः कोपयन् वानर-अधिपम्

अन्वयः

ततः सुग्रीवः रामसमन्वितः किष्किन्धां प्राप्य अतीव संहृष्टः वानराधिपम् कोपयन् जगर्ज ।

तात्पर्यम्

ततः सुग्रीवः रामसमन्वितः किष्किन्धां प्राप्तवान् । पश्चात् अतीव संहृष्टः वानराधिपम् कोपयन् जगर्ज ।

व्याकरणम्

♦ सन्धिः

ततः + रामसमन्वितः - विसर्गउकारः

जगर्ज + अतीव - सवर्णदीर्घसन्धिः

♦ समासः

वानराणाम् अधिपः - वानराधिपः - षष्ठीतत्पुरुषः - तम्

♦ कृदन्ताः

प्राप्य - प्र + आप् + ल्यप् प्रत्ययः

संहृष्टः - सम् + हृष् + क्त प्रत्ययः

*जगर्ज - गर्ज् धातोः लिट् लकारः प्रथमपुरुषः जगर्ज जगर्जतुः जगर्जुः*

मूल श्लोक:

वाली निष्क्रम्य सुग्रीवं समरेऽपीडयद्भृशम् ।
सोऽपि सम्भग्नसर्वाङ्गः प्राद्रवद्राघवान्तिकम् ॥८॥

पदविभाग:

वाली निष्क्रम्य सुग्रीवं समरे अपीडयद् भृशम् सः अपि सम्भग्न-सर्वाङ्गः प्राद्रवत् राघवान्तिकम्

अन्वय:

वाली निष्क्रम्य, समरे सुग्रीवं भृशम् अपीडयत् । स अपि सम्भग्नसर्वाङ्गः राघवान्तिकम् प्राद्रवत् ।

तात्पर्यम्

वाली निष्क्रम्य युद्धे सुग्रीवं भृशम् अपीडयत् ।अत: स: अपि सम्भग्नसर्वाङ्गः राघवान्तिकम् प्राद्रवत् ।

व्याकरणम्

♦ सन्धि:
समरे + अपीडयत् - पूर्वरूपसन्धि:
अपीडयत् + भृशम् - जश्त्वसन्धि:
सः + अपि - विसर्गउकार: पूर्वरुपसन्धि:
प्राद्रवत् + राघवान्तिकम् - जश्त्वसन्धि:
♦ कृदन्ता:
निष्क्रम्य -निस् +क्रम् + ल्यप् प्रत्यय:
*प्राद्रवत् - प्र+ अद्रवत् - अद्रवत् - द्रु धातु; लङ् प्रपु एक अद्रवत् अद्रवताम् अद्रवन्*

मूल श्लोक:

कृतचिह्नस्तु रामेण पुनरेव स वालिनम् ।
रणायाह्वयत क्षिप्रं तस्थौ रामस्तिरोहितः ॥९॥

पदविभाग:

कृतचिह्नः तु रामेण पुनः एव सः वालिनम् । रणाय आह्वयत क्षिप्रं तस्थौ रामः तिरोहितः

अन्वय:

पुनः एव रामेण कृतचिह्नः तु सः वालिनम् क्षिप्रं रणाय आह्वयत । रामः तिरोहितः तस्थौ ।

तात्पर्यम्

पुनः एव रामेण कृतचिह्नः तु सः वालिनम् क्षिप्रं रणाय आह्वयत । रामः तिरोहितः तस्थौ ।

व्याकरणम्

♦ सन्धि:
कृतचिह्नः + तु - विसर्गसकार:
पुनः + एव - विसर्गरेफ:
सः + वालिनम् - विसर्गलोप:
रणाय + आह्वयत - सवर्णदीर्घसन्धि:
रामः + तिरोहितः - विसर्गसकार:

मूल श्लोक:

हेममाली ततो वाली तारयाऽभिहितं हितम् ।
निरस्य कुपितो भ्रात्रा रणं चक्रे सुदारुणम् ॥१०॥

पदविभाग:

हेममाली ततः वाली तारया अभिहितं हितम्  निरस्य कुपितः भ्रात्रा रणं चक्रे सुदारुणम्

अन्वय:

ततः हेममाली वाली तारया अभिहितं हितं निरस्य, कुपितः भ्रात्रा सुदारुणं रणं चक्रे

तात्पर्यम्

ततः हेममाली वाली तारया अभिहितं हितं निरस्य कुपितः भ्रात्रा सुदारुणं रणं कृतवान् ।

व्याकरणम्

♦ सन्धि:
ततः + वाली - विसर्गउकार:
तारया + अभिहितं - सवर्णदीर्घसन्धि:
कुपितः + भ्रात्रा - विसर्गउकार:
हेममाला अस्य अस्तीति हेममाली

सुदारुणं - अतिभयङ्करम्
अभिहितम् - अवदत्

मूल श्लोक:

बाणेन वालिनं रामो विद्ध्वा भूमौ न्यपातयत् ।
सोऽपि राम इति ज्ञात्वा त्यक्त्वा देहं दिवं ययौ ॥११॥

पदविभाग:

बाणेन वालिनं रामः विद्ध्वा भूमौ न्यपातयत् सः अपि राम इति ज्ञात्वा त्यक्त्वा देहं दिवं ययौ

अन्वय:

रामः वालिनं बाणेन विद्ध्वा भूमौ न्यपातयत् । सः अपि 'राम' इति ज्ञात्वा देहं त्यक्त्वा दिवं ययौ ।

तात्पर्यम्

रामः वालिनं बाणेन विद्ध्वा भूमौ न्यपातयत् । सः अपि 'राम' इति ज्ञात्वा देहं त्यक्त्वा स्वर्गं गतवान् ।

व्याकरणम्

♦ सन्धि:

रामः + विद्ध्वा - विसर्गउकार:

सः + अपि -विसर्गउकार:पूर्वरूपसन्धि:

♦ कृदन्ता:

त्यक्त्वा - त्यज् + क्त्वा प्रत्यय:

विद्ध्वा - व्यध् + क्त्वा प्रत्यय:

ज्ञात्वा - ज्ञा + क्त्वा प्रत्यय:

न्यपातयत् - नि + अपातयत्

अपातयत् - पत् + णिच् + लङ् लकार: प्रथमपुरुष: *अपातयत् अपातयताम् अपातयन्*

ययौ - या धातु: लिट् लकार: प्रथमपुरुष: ययौ ययतु: ययु:

मूल श्लोक:

पश्चात्तपन्तं सुग्रीवं समाश्वास्य रघूत्तमः ।
वानराणामधिपतिं चकाराश्रितवत्सलः ॥१२॥

पदविभाग:

पश्चात् तपन्तं सुग्रीवं समाश्वास्य रघु-उत्तमः वानराणाम् अधिपतिं चकार आश्रितवत्सलः

अन्वय:

पश्चात् रघूत्तमः आश्रितवत्सलः तपन्तं सुग्रीवं समाश्वास्य वानराणाम् अधिपतिं चकार ।

तात्पर्यम्

अत: रघूत्तमः आश्रितवत्सलः तपन्तं सुग्रीवं समाश्वास्य वानराणाम् अधिपतिं कृतवान् ।

व्याकरणम्

♦ सन्धि:
चकार + आश्रितवत्सलः - सवर्णदीर्घसन्धि:
♦ समास:
रघूणाम् उत्तम: - रघूत्तम: - षष्ठीतत्पुरुष:
♦ कृदन्ता:
समाश्वास्य - सम् + आ + श्वस् + ल्यप् प्रत्यय:
*चकार - कृ परस्मैपदि धातु: लिट् लकार: प्रथमपुरुष: चकार चक्रतु: चक्रु:*

मूल श्लोक:

ततो माल्यवतः पृष्ठे रामो लक्ष्मणसंयुतः ।
उवास चतुरो मासान्सीताविरहदुःखितः ॥१३॥

पदविभाग:

ततः माल्यवतः पृष्ठे रामः लक्ष्मणसंयुतः उवास चतुरः मासान् सीताविरहदुःखितः

अन्वय:

ततः लक्ष्मणसंयुतः सीताविरहदुःखितः रामः माल्यवतः पृष्ठे चतुरः मासान् उवास ।

तात्पर्यम्

ततः लक्ष्मणसंयुतः सीताविरहदुःखितः रामः माल्यवतः पृष्ठे चतुरः मासान् उवास ।

व्याकरणम्

♦ सन्धि:

ततः + माल्यवतः - विसर्गउकार:
रामः + लक्ष्मणसंयुतः - विसर्गउकार:
चतुरः + मासान् - विसर्गउकार:

♦ समास:

सीताया: विरह: - सीताविरह: - पञ्चमीतत्पुरुष:

सीताविरहेन दु: खित: - सीताविरहदुःखितः - तृतीयातत्पुरुष:

लक्ष्मणेन सह संयुतः - लक्ष्मणसंयुतः- तृतीयातत्पुरुष:

मूल श्लोक:

अथ रामस्य निर्देशाल्लक्ष्मणो वानराधिपम् ।
आनयत्प्लवगैः सार्धं हनूमत्प्रमुखैर्गिरिम् ॥१४॥

पदविभाग:

अथ रामस्य निर्देशात् लक्ष्मणः वानराधिपम् आनयत् प्लवगैः सार्धं हनूमत्-प्रमुखैः गिरिम्

अन्वय:

अथ लक्ष्मणः रामस्य निर्देशात् प्लवगैः हनूमत्प्रमुखैः सार्धं वानराधिपम् गिरिम् आनयत् ।

तात्पर्यम्

पश्चात् लक्ष्मणः रामस्य निर्देशात् प्लवगैः सार्धं हनूमत्प्रमुखैः वानराधिपम् गिरिम् आनयत् ।

व्याकरणम्

♦ सन्धि:

लक्ष्मणः + वानराधिपम् - विसर्गउकार:
हनूमत्प्रमुखैः + गिरिम् - विसर्गरेफ:

♦ समास:

वानराणाम् अधिप: - वानराधिप: - षष्ठीतत्पुरुष: - तम्

मूल श्लोक:

सुग्रीवो राघवं दृष्ट्वा वचनात्तस्य वानरान् ।
न्ययुङ्क्त सीतामन्वेष्टुमाशासु चतसृष्वपि ॥१५॥

पदविभाग:

सुग्रीवः राघवं दृष्ट्वा वचनात् तस्य वानरान् न्ययुङ्क्त सीताम् अन्वेष्टुम् आशासु चतसृषु अपि

अन्वय:

सुग्रीवः राघवं दृष्ट्वा तस्य वचनात् वानरान् सीताम् अन्वेष्टुम् चतसृषु आशासु अपि न्ययुङ्क्त ।

तात्पर्यम्

सुग्रीवः राघवं दृष्ट्वा तस्य वचनात् वानरान् सीताम् अन्वेष्टुम् चतसृषु आशासु अपि न्ययुङ्क्त ।

व्याकरणम्

♦ सन्धि:

सुग्रीवः + राघवं - विसर्गउकार:

चतसृषु + अपि - यण्सन्धि:

♦ कृदन्ता:

दृष्ट्वा - दृश् + क्त्वा प्रत्यय:

अन्वेष्टुम् - अनु + इषु + तुमुन्प्रत्यय:

न्ययुङ्क - नि + अयुङ्क्त

*अयुङ्क्त - युज् धातो: लङ् लकार: प्रथमपुरुष: न्ययुङ्क्त न्ययुञ्जाताम् न्ययुञ्जत*

मूल श्लोक:

ततो हनुमतः पाणौ ददौ रामोऽङ्गुलीयकम् ।
विश्वासाय तु वैदेह्यास्तद्गृहीत्वा स निर्ययौ ॥१६॥

पदविभाग:

ततः हनुमतः पाणौ ददौ रामः अङ्गुलीयकम् विश्वासाय तु वैदेह्याः तद्गृहीत्वा स निर्ययौ

अन्वय:

ततः रामः हनुमतः पाणौ अङ्गुलीयकं ददौ । स: वैदेह्याः विश्वासाय तु तद्गृहीत्वा निर्ययौ ।

तात्पर्यम्

पश्चात् रामः हनुमतः पाणौ अङ्गुलीयकं दत्तवान् । स: वैदेह्याः विश्वासाय तु तत् गृहीत्वा निर्ययौ ।

व्याकरणम्

♦ सन्धि:
ततः + हनुमतः - विसर्गउकार:
रामः + अङ्गुलीयकम् - विसर्गउकार:पूर्वरूपसन्धि:
वैदेह्याः + तत् - विसर्गसकार:
तत् + गृहीत्वा - जश्त्वसन्धि:
स: + निर्ययौ - विसर्गलोप:

♦ कृदन्ता:
गृहीत्वा - ग्रह् + क्त्वा प्रत्यय:

मूल श्लोक:

ततो हनूमत्प्रमुखाः वानरा दक्षिणां दिशम् ।
गत्वा सीतां विचिन्वन्तः पर्वतं विन्ध्यमाप्नुवन् ॥१७॥

पदविभाग:

ततः हनूमत्प्रमुखाः वानराः दक्षिणां दिशम्  गत्वा सीतां विचिन्वन्तः पर्वतं विन्ध्यम् आप्नुवन्

अन्वय:

ततः हनूमत्प्रमुखाः वानरा: दक्षिणां दिशम् गत्वा सीतां विचिन्वन्तः विन्ध्यम् पर्वतं आप्नुवन् ।

तात्पर्यम्

पश्चात्  हनूमत्प्रमुखाः वानरा: दक्षिणां दिशम् गत्वा सीतां विचिन्वन्तः विन्ध्यम् पर्वतम् आप्नुवन् ।

व्याकरणम्

♦ सन्धि:
ततः + हनूमत्प्रमुखाः - विसर्गउकार:
हनूमत्प्रमुखाः + वानराः - विसर्गलोप:
वानरा: +  दक्षिणां - विसर्गलोप:

♦ कृदन्ता:
गत्वा - गम् + क्त्वा प्रत्यय:

मूल श्लोक:

समयातिक्रमात्तत्र चक्रुः प्रायोपवेशनम् ।
तेऽत्र सम्पातिना प्रोक्तां सीतावार्त्तां च शुश्रुवुः॥१८॥

पदविभाग:

समयातिक्रमात् तत्र चक्रुः प्रायोपवेशनम्  ते अत्र सम्पातिना प्रोक्तां सीतावार्त्तां च शुश्रुवुः

अन्वय:

(ते) तत्र समयातिक्रमात् प्रायोपवेशनम् चक्रुः । अत्र ते सम्पातिना प्रोक्तां सीतावार्त्तां च शुश्रुवुः।

तात्पर्यम्

पश्चात्  हनूमत्प्रमुखाः वानरा: तत्र समयातिक्रमात् प्रायोपवेशनम् चक्रुः । अत्र ते सम्पातिना प्रोक्तां सीतावार्त्तां च शुश्रुवुः।

व्याकरणम्

♦ सन्धि:
ते + अत्र - पूर्वरूपसन्धि:

*शुश्रुवुः- श्रु धातो: लिट् लकार: प्रथमपुरुष: शुश्राव शुश्रुवतु शुश्रुवु*

सम्पाति - गृघ्रराजः - जटायुष: ज्येष्ठ: भ्राता

मूल श्लोकः

ततः प्रापुरुदन्वन्तम् अङ्गदाद्याः प्लवङ्गमाः ।
तं विलङ्घयितुं तेषां न कश्चिदभवत् क्षमः ॥१९॥

पदविभागः

ततः प्रापुः उदन्वन्तम् अङ्गदाद्याः प्लवङ्गमाः तं विलङ्घयितुं तेषां न कश्चिद् अभवत् क्षमः

अन्वयः

ततः अङ्गदाद्याः प्लवङ्गमाः उदन्वन्तं प्रापुः । तं विलङ्घयितुं तेषां कश्चिद् क्षमः न अभवत् ।

तात्पर्यम्

पश्चात् अङ्गदाद्याः वानराः उदन्वन्तं प्रापुः । तं विलङ्घयितुं तेषां कश्चिद् समर्थः न अभवत् ।

व्याकरणम्

♦ सन्धिः

प्रापुः + उदन्वन्तम् - विसर्गरेफः

कश्चित् +अभवत् - जश्त्वसन्धिः

♦ कृदन्ताः

विलङ्घयितुम् - वि + लन्घ् + तुमुन् प्रत्ययः

प्रापुः- प्र + आपुः

आप् धातोः लिट् लकारः आप आपतुः आपुः

अङ्गदः - वालिपुत्रः

क्षमः - समर्थः

उदन्वान् - समुद्रः

मूल श्लोक:

स्वप्रभावप्रशंसाभिस्तदा जाम्बवदुक्तिभिः ।
संवर्धितो महेन्द्राद्रिमारुरोहानिलात्मजः ॥२०॥

पदविभाग:

स्वप्रभावप्रशंसाभिः तदा जाम्बवद्उक्तिभिः संवर्धितः महेन्द्राद्रिम् आरुरोह अनिलात्मजः

अन्वय:

तदा अनिलात्मजः जाम्बवद्उक्तिभिः स्वप्रभावप्रशंसाभिः संवर्धितः महेन्द्राद्रिम् आरुरोह ।

तात्पर्यम्

तदा हनूमान् जाम्बवद्उक्तिभिः स्वप्रभावप्रशंसाभिः संवर्धितः महेन्द्राद्रिम् आरुरोह ।

व्याकरणम्

♦ सन्धि:

स्वप्रभावप्रशंसाभि: + तदा - विसर्गसकार:
संवर्धितः + महेन्द्राद्रिम् - विसर्गउकार:
आरुरोह + अनिलात्मजः - सवर्णदीर्घसन्धि:

आरुरोह - आ + रुरोह
अनिलात्मज: - हनूमान्

*॥ इति श्रीरामोदन्ते किष्किन्धाकाण्डः समाप्तः ॥*

# ॥ किष्किन्धाकाण्डः संक्षेपः ॥

अथ सुग्रीवनिर्दिष्टः हनूमान् रामलक्ष्मणौ प्राप्तवान् । सः तु वृत्तान्तं श्रुत्वा तेन तौ समयोजयत् । ततः हनुमान् रामस्य वृत्तान्तं सुग्रीवाय निवेद्य, तयोः पावकसन्निधौ सख्यं च कारयामास । तदा रामः वालिनम् हनिष्यामि इति प्रतिजज्ञे । शुग्रिवः वैदेहीं दर्शयिष्यामि इति प्रतिजज्ञे । अथ सुग्रीवः रामाय स्वस्य भ्रातृवैरस्य कारणम् च तस्य तत् बलाधिक्यं च निवेदितवान् । सुग्रीवः रामाय भ्रातृवैरस्य कारणम् उक्तवान् । तत्क्षणं सुग्रीवेण दुन्दुभेः कायं प्रदर्शितम् । रामः पादाङ्गुष्ठेन सुदूरं प्रेषयामास । पुनः च रघूत्तमः तेन दर्शितान् सप्त सालान् एकेन बाणेन, सार्धं तस्य अनुशङ्कया चिच्छेद ।

ततः सुग्रीवः रामसमन्वितः किष्किन्धां प्राप्तवान् । पश्चात् अतीव संहृष्टः वानराधिपम् कोपयन् जगर्ज । वाली निष्क्रम्य युद्धे सुग्रीवं भृशम् अपीडयत् ।अतः सः अपि सम्भग्नसर्वाङ्गः राघवान्तिकम् प्राद्रवत् । पुनः एव रामेण कृतचिह्नः तु सः वालिनम् क्षिप्रं रणाय आह्वयत । रामः तिरोहितः तस्थौ । ततः हेममाली वाली तारया अभिहितं हितं निरस्य कुपितः भ्रात्रा सुदारुणं रणं कृतवान् । रामः वालिनं बाणेन विद्ध्वा भूमौ न्यपातयत् । सः अपि 'राम' इति ज्ञात्वा देहं त्यक्त्वा स्वर्गं गतवान् ।

अतः रघूत्तमः आश्रितवत्सलः तपन्तं सुग्रीवं समाश्वास्य वानराणाम् अधिपतिं कृतवान् । ततः लक्ष्मणसंयुतः सीताविरहदुःखितः रामः माल्यवतः पृष्ठे चतुरः मासान् उवास । पश्चात् लक्ष्मणः रामस्य निर्देशात् प्लवगैः सार्धं हनूमत्प्रमुखैः वानराधिपम् गिरिम् आनयत् । सुग्रीवः राघवं दृष्ट्वा तस्य वचनात् वानरान् सीताम् अन्वेष्टुम् चतसृषु आशासु अपि न्ययुङ्क्त । पश्चात् रामः हनुमतः पाणौ अङ्गुलीयकं दत्तवान् । सः वैदेह्याः विश्वासाय तु तत् गृहीत्वा निर्ययौ ।

पश्चात् हनूमत्प्रमुखाः वानराः दक्षिणां दिशम् गत्वा सीतां विचिन्वन्तः विन्ध्यम् पर्वतम् आप्नुवन् । पश्चात् हनूमत्प्रमुखाः वानराः तत्र समयातिक्रमात् प्रायोपवेशनम् चक्रुः । अत्र ते सम्पातिना प्रोक्तां सीतावार्त्तां च शुश्रुवुः । पश्चात्

अङ्गदाद्याः वानराः उदन्वन्तं प्रापुः । तं विलङ्घयितुं तेषां कश्चिद् समर्थः न अभवत् । तदा हनूमान् जाम्बवद्उक्तिभिः स्वप्रभावप्रशंसाभिः संवर्धितः महेन्द्राद्रिम् आरुरोह ।

***॥ इति श्रीरामोदन्ते किष्किन्धाकाण्डः संक्षेप समाप्तः ॥***